यामभवंतिप्रणमंतुवं॥४०॥मत्तोरर्यास्तदेरेवंपंचायतनसंस्थितं॥प्ररक्षिणंप्रकुर्वंतिनत्मपापक्षयावहं॥४१
॥ब्रह्मवासेनुपानायेपिबंत्रिहरमन्नवा॥वाराणस्योविशाखपप्रमतेत्रिदिवालयाः॥४२॥सतत्रब्रह्मराक्षसिद्धो
विकृतरूपधृक्॥ब्रह्मराक्षसंप्राप्तायत्रालेसद्विजाधमः॥४३॥सतुविकृतवेषेनदृष्टसिद्धिपुरोगतः॥सादरंप्राहसत्रे
णमस्तुभ्यायतिवरेत्यच॥४४॥नरादरेणरूपेणकांतेनचवपुषेनच॥हर्षतेनयस्तथाशंकेस्वर्गब्रह्मेवनिनिति॥५
॥श्रीऋषयऊचुः॥॥साधुसाधुसर्वविज्ञानोमहाब्रह्मनमोस्तुते॥स्वर्गावहमनुप्राप्तःसत्संसंगेनसंशयः॥६॥प्रिये
नेकथयिष्यामियतेसर्वयथेप्सितं॥७॥॥ब्रह्मराक्षसउवाच॥॥यदिस्वर्गेनिवसतितनःसिद्धिनरोत्तमः॥तमापस
रसांश्रेष्ठायदिनानाभिरुच्यते॥८॥॥सिद्धउवाच॥॥योप्रेष्यरेत्यकंपतेनपंत्येवसागरः॥कोहिस्वर्गालयंरम्यं
तेनूहिरसोत्तम॥९॥ब्रह्मराक्षसिवचनात्नुभंसातेवुद्धेरनाम्यता॥इत्कल्पोब्राह्मणैर्वेसिद्धसिद्धगणाश्रुते॥५०॥

अपक्रोतेहिवक्रोतोवापुनासुहृतोयथा॥३३॥कथंहिनिधिकोनाचेद्वेखोयथापुरात्॥४॥अयत्नपक्वकुतारेभोन्नह
यस्यामिवश्रियः॥पूर्वचंद्रनिवरनेमरनेगमयामिवा॥४२॥गतकुंभनिभास्तोचस्तवास्तोमुपूर्णेभिनो॥पनविस्तीर्ण
त्वसनोगंजनासोकशोभिना॥४३॥स्वर्गोपिरत्नभूतोत्रप्रत्यपमरसेवणं॥फुल्लतास्तारविंदास्तोपरास्तोसुप्रनिहितेष्ठ
विणाधुनिभिनायंतुरुरासुरवतारिणः॥फरुरद्धानवत्स्तोगीसित्यवंचनमब्रवात्॥४५॥वारणस्तोतुवसतिब्रात्मणो
हिवरानने॥सत्यादृछतिरुश्रोणीयदिनास्तिपृछतो॥४६॥४रम्नउवाच॥ननतोनास्तहंविप्रचिनयस्यापियत्न
तः॥यत्नेवमुक्तास्परसिंहसिधवरिने॥४७॥स्तमेपावकयोपूर्णआविशेशान्तलोचना॥अथभूयःसमित्तो
पिसिंहसिधशानेर्नो॥४८॥वारणसोमनुप्राप्तःवयेरायतनकारकः॥नेवतेरहशेनस्तोपूर्योपुरवरात्तये॥४९
हिनातानांनेवेहशिरेणपुनरागमं॥सतेब्रह्मस्वशेवाचवारणस्यविकेतवः॥५०॥कथंब्रात्मणहृछासौत्वयावर
मूरप्सरः॥कोनिवाहहतेपछापृछतेवावरांगना॥५१॥॥सिद्धउवाच॥रंभादृछाचपृछाचनाम्नासवचनात्मया॥चिरंविचिं
त्यमत्वाहनेवज्ञानासिकोप्यसौ॥५२॥॥ब्रात्मणउवाच॥ब्रात्मणोसिपुनर्ब्रूवेयदिनाममहामते॥गछसिद्धनतोत्या
सवाच्यात्रिभवेत्कथं॥५३॥एवंभवदिकस्कासमिहभूयहिशेनमः॥स्वर्गंतुकृतिनाव्यासत्यागेनागतासुरुप्र

सरस्तांपुपुश्रेणीगनरानजसांगतौ॥अपश्यत्पश्यतांचित्तेहरंतिविमनुप्रवे॥५५॥सतांपद्मरानवर्णोस्तुनतस्त
नशालिनी॥वाचासिधस्यप्रहसन्रंभानामउपसूचित्॥५६॥गछनित्वंसरोवर्यंब्रात्मणोब्रात्मप्रियः॥वारणस्योपुन
श्राहंनानाभिनपुनःकथं॥५७॥स्मितंविधिसितंकत्वातनःसर्वासरोवराः॥इमासिद्धसहस्राणिउमाचवरितारुणा॥
५८॥सिद्धत्वंब्रात्मणोब्रूहियदिज्ञानुकूलेछसि॥नियमंकुरुवित्तानेरामसिद्धनविष्यता॥५९॥चंदनेचनमागस्यसंगते
भूचचारसः॥सवैसिद्धपुनर्देवादेवगंधर्वसेविते॥६०॥रुरुकामनुप्राप्यनेब्रत्राणमपश्यत॥सचैनंब्रात्मणःप्राहप्रहि
ब्रामूरर्वसंस्तुतः॥६१॥किमिदानामहल्ब्रत्मन्ब्रूसीवदतिशोभना॥सिद्धउवाच॥यदीछसिपरिज्ञानुमात्मानंकिच
चस्तदा॥६२॥देवैश्चनियमंकत्वानियमंकुरुराज्यं॥३॥ब्रात्मणउवाच॥यदेवैरनियमारनेरुश्चप्रश्नस्मते॥६३
प्रश्नतेयदिलोचापिरंभाश्चस्मरसंदिवा॥परातिरादयतिपःसत्वंपश्यतिब्रात्मणी॥६४॥इतिदेवचनंश्रुत्वासिद्ध
स्यहितन्मनः॥दिवंसेवागतत्तूर्णंवायुसत्याहसोयथा॥६५॥सरस्तामब्रवीद्देवीसेतोपृछसिब्रात्मणं॥रंभेतदेविजा
नासिपाषाणस्योनखादतः॥६६॥यदूरंदिवसेतेनपाषाणेनियतामतिः॥ततमेवदिवसेरंभातांपुरीमभ्यचिंतयत्॥६७॥

तस्यांयोप्रकुर्तेनाप्रियमेनहिजन्मनः॥प्रकुर्याद्वीयतेरस्यप्रदीपेनयथानिशिः॥६७॥यस्ययस्यापियोयासिनस्यकूर्यां सवैहिजः॥नतस्यतस्यस्त्रियोयत्नोनियमेनाभिमाषितः॥६८॥सयस्यनाप्नातिगृहेयस्यनात्मातिवेगृहे॥कथंनोकामिकोवा हमितितस्यानवन्मनि॥७०॥नियमस्कसनेविप्रेत्यवाप्यमनुपाल्यध॥सिद्धिंपरमिकांप्राप्यब्रह्मलोकंसगच्छति॥७१ नियमोवायमोवापिद्वयोवापदवाबहू॥सएवायत्निनःस्वर्गेनियमेननरोविके॥७२॥नियमाद्धुवलोकंचप्राप्यतेनि यमोह्यतः॥कमलपुरंगतोवासवनंइतिश्रुचिरेतोहिवि॥७३॥इतिसिद्धिमवाप्यवर्द्धने॥कमलपुरंगतोवसवनंतति श्रुचिरेतोहिवि॥इतितपनेरुतंनिनेनियमेगदिसमयाफले॥७४॥कुरुकरुणोसदाहियमेनियमसनिदमावव र्धनं॥७५॥ ॥इतिश्रीसत्याढिखंडेस्कंदपुराणेयमोपदेशेनामत्रयोविंशतिमोध्यायः॥ २३॥ ॥

॥ श्रीगणेशायनमः॥ ॥श्रीमहेश्वरउवाच॥शृणुसुव्रतचक्रूरोपिदद्यादानेजितात्मवान्॥स्तोकंवापदसंनयथाध र्मोपिलभ्यते॥१॥एकभक्तेनयोदेवामासंपर्णंशिरोनिषेत्॥सतेनकर्मणादेवीभवनेसोचनित्यशः॥२॥षोण्मासेतु नेदद्यात्तत्रत्यान्दानमिधीयते॥मासमासेतुकुर्वाणोस्त्रिधामाप्नोतिमेप्रिये॥३॥एकभक्तंचकुर्वाणोफाल्गुणेमासि नित्यशः॥स्त्रियंसौभाग्यमाप्नोतिस्त्रियाचपरमंपदं॥४॥यस्त्रिषेद्येकभक्तेनमाघेवायतिसंयतः॥लोकेपूजयतेदि व्यान्यस्कल्पेष्टसिषेतनः॥५॥वैशाखमासमेयोवानक्तंकुर्याद्येकभक्तंसमाचरेत्॥ज्येष्ठेभवतिब्रात्मण्यंभोगानाप्नोतिपुष्क लान्॥६॥आषाढंवापियोमासमेकभक्तंसमाचरेत्॥ज्येष्ठेभवतिब्रात्मण्यंभोगानाप्नोतिपुष्कलान्॥७॥श्रावणंवा योमासमेकभक्तंसमाचरेत्॥सेनापत्यंचसंप्राप्यबलवान्प्रियतायते॥८॥योपिचाश्वयुजेमासमेकभक्तेनतिष्ठति॥ वाणिज्येऽभवतेनस्यकृषिःपशुगणास्तथा॥९॥कार्तिकंचापियोमासमेकभक्तेनतिष्ठति॥अश्वमेधफलंप्राप्या श्निलोकेमहीयते॥१०॥यःस्त्रिषेद्येकभक्तेनयावज्जीवंनरोत्तमः॥विमानेनैवकुर्वाणोमहाह्लादुडुलोकगो॥११ संवत्सरंतयोकुर्वमेकभक्तेनतिष्ठति॥सपार्थिवसमोभूत्वामाहिवत्समहेश्वरत्॥१२॥अहोरात्रंत्रयोदेवाकुर्यादे

वेनरोत्तमः॥१२॥नोससुवर्णनाफलंप्राप्नोतिमानवः॥१३॥समासेत्रहोरात्रंपक्षेरोतिचनरोत्तमः॥सतेनकर्मणाहेवी
विद्वान्प्रवतिधार्मिकः॥१४॥चतुर्दश्यामष्टम्यांचउभयोपक्षयोरपि॥अहोरात्रंनपेद्यत्कंसंवत्सरमनोषितः१५
सतेनकर्मणायुक्तःसर्वपापविवर्जितः॥नयातिनरकंचैवयमंचसनपश्यति॥१६॥मासेमासेनुयःकुर्यान्नेयक
मकंतुवैनरः॥वेकल्पंपरमाप्नोतिसंवेदेत्यमरंपदं॥१७॥चतुर्थेहनियोभुंक्तेश्रद्धाप्रक्रिसमन्वितः॥शिवदेव
प्रियोभूत्वाचरतेवकप्रिसह॥१८॥दशम्येहनियोभुंक्तेदशास्यफलंलभेत्॥अश्विमासस्यमासेतुपूजयत्व
मतेसदा॥१९॥मानुष्यंचपुनःप्राप्यदशानार्योलभेतसः॥सौवर्णमक्षयंचैवनचकालेमितेउतसः॥२०॥एकद
शपफलंप्राप्यसरुद्रोगणानांलभेतेनेउपवसेत्तुयोनित्यंश्रावतिर्दिवसेनरः॥२१॥विद्रोषमार्गवेल्लानंप्राप्य
दिव्यंफलंचिनः॥अद्यहेमानुयोभूयोसनरोजायतेशुचिः॥२२॥यत्मान्यसमायुक्तोजायतेसकुलेचिनः॥
चतुर्दश्यांचयोनित्यंसिवसंचक्षिपेन्नरः॥२३॥नेमिषेलोकमाप्नोतिसवद्भवपतिर्नरः॥अर्थमासंसिवेद्यस्फ
नित्यमेवलतेद्विफ॥२४॥देवराजश्चनुष्पोसोभूत्वास्वर्गेचतिष्ठति॥इहराजामहाभूमौभूपएवभिजायते२५

यस्फमासंसिवेद्यस्तुजितक्रोधोजितेंद्रियः॥विमानेनसदिव्येनस्वस्वरूपिसमावृतः॥२६॥पूज्यमानोमहद्दिव्यैभू
यमानश्चसर्वशः॥स्वनरादित्यसंकाशंयस्फंसंस्फरमेघते॥२७॥एवंलोकेषुवसतिनयाजस्मानरोत्तमः॥अथ
वापुनरायातिब्राह्मणोभवतःश्वरः॥२८॥योगंचतत्रबभतेधनेश्वंसमश्नुते॥योगीभूत्सतरामूत्वाशेगर्गपप
निर्मवेद्वा॥२९॥सर्वेचेउपवासाश्चनांविधिंपरमपुण्यदं॥देवीश्रणुष्वमसोम्यथाचरतुपूर्वशः॥३०॥अतस्तुपि
रयोरानोरुचिस्यंसुसमाहितं॥दिनियत्वापिवात्मानंपवासंचरेद्नरः॥३१॥ब्रायाद्विषवर्णिचैवकुर्यादग्रेरव
न्नाधावतोक्रोधलोभौनेथाधार्मिकःसत्यवादिभिः॥३२॥नपत्सदेवगायत्रीपवित्राणिचसर्वशः॥रुद्रमाधर्वणंचापि
स्तंदिव्यंचजलाशयः॥३३॥कुशानास्तीर्यविधिवत्स्थंडिलपरिवर्जितः॥समश्रीयातोरात्रौवितरागोविमत्सरः
॥३४॥धारंसोनानितिनाम्निर्यविधिवच्छुचिवर्जितः॥समश्रीयाकतोरात्रौवीतरागोविमत्सरः॥३५॥यावत्सवानि
निष्टेनेवादित्रंप्रभुनेजनयेत्ततः॥पूर्णमभूत्कालेब्रात्पणोनांतपरं॥३६॥सहस्रमघकंनाम्नाविजेपिबातुस
रः॥हविष्यभोजनंदद्यात्सावोवासोसिचक्रमात्॥३७॥कपर्दिनिलपात्रंवाएकैकंब्रह्मपयेत्॥ततस्फमा

श्रोत्रियदम्पूर्वजैर्नभवेत्॥५०॥वृषमेधमजंनीलांवाल्पवेतनरोत्तमः॥अश्वमेधंवापिमहाक्रतोसपितॄन्तारयेत्नरः॥
५१॥धावतस्तस्यरोमाणिदक्षिणस्यांनरोत्तम॥तावंत्येवसहस्राणिवर्षाणिदिविमोदते॥५२॥तिलपात्राणियाद्या
त्विप्रेभ्यःशुद्धमानसः॥श्रमावाप्तसमासाद्यकुलान्यांतुसमाहितः॥५३॥सपितॄन्तारयित्वातुस्वर्गेनरपुंग
व॥पितृलोकमवाप्नोतिरेवत्कल्पमनुश्रुते॥५४॥उपवासविधिस्तेऽयंकथितोमेशृण्वतोनघ॥पवित्राणांविधिंभू
यश्शृणुध्वंसुसमाहितः॥५५॥यत्कृच्छ्रायणेकुर्यात्तत्पवित्रंतुसमाहितः॥ससोमजोक्रमासाद्यसोमेनसहमो
दतेतु॥५६॥प्रजापतेनयःकश्चित्येकरोद्वत्सरंपिवा॥प्रजापतिसमोभूत्वास्वर्लोकेमहीयते॥५७॥
यस्त्वेतपनेकृच्छ्रंकरोतिनरसत्तम॥आत्मासमुद्धरेत्कृत्स्नंत्रिलोकंचगच्छति॥५८॥महासांपतनंयज्ञंकृत्वा
निरुमहामतः॥सर्वतानमवाप्नोतिब्रह्मलोकंचगच्छति॥५९॥समुक्तोसर्वपापेभ्यस्वर्गेदिविमूजितः॥मो
दतेरेवतुनरःसर्वस्मभुवनेत्रजेत्॥६०॥रुद्रकन्यतिरुद्रेण्यगायपितमवाप्नुयात्॥यस्तुसर्वाणिकुरुतेरुद्रा
नरसत्तमः॥६१॥यंयंचिन्तयतेकामंतंतमेवसमश्नुते॥यस्यकस्यपिदेवोहरुद्रस्यसमाहितः॥६२॥सतेनसि



द्धोभवतिरेवत्वंचापिविंदति॥पक्षान्यक्षत्रकयोनित्यंनरसंवत्सरंवसेत्॥६३॥पावकंचापियुंजानोगोमुत्रेणापिसं
स्कृते॥पिनाकपाणिभुक्त्वाश्वक्षारलवणेपिवा॥६४॥अश्वमेधफलंलब्ध्वाब्रह्मलोकंसगच्छति॥श्वेतेविमानसंयु
क्तेप्राप्नुयात्परमंपदं॥६५॥ब्रह्मचर्यसमानोवैमहानेहहिविद्यते॥सलोकतापदंप्राप्यययेशंमोक्षमश्नुते॥६६॥
स्वर्गेवासहस्राण्यमोदतिहरिणा॥यावन्प्राप्यचसर्वाणिहरिकानिचयोस्मिन्॥६५॥विनामंत्रेणसततंभू
ताणामिहसर्वशः॥विधीयतेनसंदेहोएवमाहप्रजापतिः॥६६॥अमेधासेमिताःसर्वेभूताविगतकिल्बिषाः॥स्त्री
रमोदेवतेभर्तीनततोन्यविधीयते॥६७॥सेगतिःपरमंधर्मंसधर्मःपरमस्मृतः॥तेनयावदनुक्तानोदमंधर्मंसमाच
रेत्॥६८॥सकृत्तंतस्ययज्ञस्यप्राप्नोतिसुसमाहितः॥फाल्गुनानांतुमासानांताधर्मंकुर्याद्विशुद्धितः॥६९॥तत्कृत्वा
स्मलभतेसर्वंतवसतेफलं॥यात्वमर्थमनुतातप्रियातस्ववसाप्रिया॥७०॥रुद्धाक्षपतपेनारीनस्मानेनहितत्फ
लं॥यच्चप्रार्थयतेकिंचिद्दृहलोकेपरत्रच॥७१॥तत्सर्वंप्राप्नुयाच्चैवरुद्रप्रसादान्नपिनाशयते॥वक्ष्याम्यास्यारंभेनर्तात्रिधा
नस्यवसोतनः॥७२॥पुत्रपत्राच्चभवतिनचदुःखंसमश्नुते॥एषोधर्मोमयाख्यातोनवलेहाद्रानने॥७३॥ ॥इ

॥ ॥श्रीगणेशायनमः॥ ॥श्रीसनत्कुमारउवाच॥देवदेवजगन्नाथसर्वज्ञश्रीप्रदायक॥पर्वताधिपतनयाकांतएवजगद्गु
रौ॥१॥करुणार्णवयोगेनरूपमद्भुतवाहना॥भूतत्रयसविंतेयोसर्वसिद्धिप्रदःसदा॥२॥इतिहासपुराणानिश्रुत्वानि
त्यप्रसादतः॥वर्णाश्रमस्थितोधर्मोश्रुतवानमुखपद्मतः॥३॥नहितृप्तामिभूतेशत्वद्वाक्यमृतमेवच॥४॥अतोश्रोतुमि
छामिवर्णोत्पत्तिंसमासतः॥५॥त्वमेकपूर्वधर्मज्ञसर्वभूतहितेरतः॥इतिवाक्यंसमाकर्ण्यजगादहरिमद्भुतः॥६॥पुत्रा
यप्रीतियुक्तायगजवक्त्रायसाधवे॥॥महादेवउवाच॥साधुसाधुत्वयापुत्रसर्वसत्वात्मकारक॥ह्यवर्णोत्पत्तिप्रभा
वानीमासात्स्वतन्त्रव॥॥कार्यतेपुरेजातेमहेत्साद्वरनंदन॥७॥ईश्वरस्यवचःश्रुत्वाभूयःपप्रच्छमुखेजगत्पति
र्यीतनोज्ञातोविष्णुर्नारायणस्वयं॥८॥तस्यवाक्यमवत्येनेमहत्त्वरत्नसंयुतं॥तस्मिंश्रुतुमरोद्व्रत्मात्यावितासीद्हृदा
किल॥९॥विष्णुनाप्रेरितंतस्मृष्टीकुरुप्रमाजया॥॥श्रीविष्णुरुवाच॥विप्रोवैचःसमाकर्ण्यसृष्टीकर्तुमनोदय॥
१०॥मुखान्नात्मणवर्णंचभुजेभ्यःक्षत्रियाःकिल॥बाहुतःवैश्यःसकाशाद्वैश्यामद्भूद्भरणतःकिल॥११॥एवंवर्णासमुद्भूता
ब्राह्मणाश्चगजानन॥स्वस्वकर्मणिनिष्णाताःस्मृतिमार्गप्रवर्तिनः॥१२॥पुराणश्रवणेदक्षाःशांताःशांताःजितेंद्रियाः

नेभ्यः सकरवपर्गश्च अनुलोमविलोमकः ॥२०॥ तेषां धर्मा प्रतीक्ष्यानां पुराणश्रुतिजाकिया ॥ सृष्टिमार्गस्तवैवोक्तो ब्रह्मा
सादिनथा मया ॥१७॥ एतस्याः श्रवणान्नूनं महापापात्प्रमुच्यते ॥१५॥ अत्रैतत्कथयिष्यामि कथामेतां पुरातनीं ॥
जबंधुः पराकश्चित्तवृधकोनामनामतः ॥१६॥ सर्वकर्मरतानासीत्सर्वधर्मबहिष्कृतः ॥ चौर्यवृत्तिरतिक्रूरः
ष्टुरोनिर्धनेक्षणः ॥१७॥ वेश्यारूपानवरतिर्दुष्टोमहामांत्साशनेरतः ॥१८॥ सविक्रयकरश्चैकवलेपानहतथा ॥१९॥
कदाचिदेवयोगेन गतोपात्रविलोकने ॥ अवरारप्रसंगार्थंकस्मिंश्चिद्विवमंदिरे ॥२०॥ रसविक्रिणोनलेनद्यसंपादि
तंबहु ॥ देवस्यदर्शनार्थीयन्नगामद्विजमंदिरं ॥२१॥ तत्रपौराणिककश्चित्शोत्रयामासवैकथां ॥ सृष्टिक्रमादिकं
तावच्छ्रुत्वासोविस्मयापन्नः ॥२२॥ तदानिरयकोविप्रोनिःपापसमजायते ॥ बुद्धाबुद्धिःसमुत्पन्नाकर्मकृत्संजि
गुप्सितं ॥२३॥ एवंकर्मकरिष्यामियज्ञावंतद्भवाष्यति ॥ अथप्रभृतिचात्रैवोत्रेनस्माद्विजसत्तमात् ॥२४॥ पुराण ७४
श्रवणंकुर्वेनान्यत्कर्मकरोमिवै ॥ इदंसमर्पितंतेनसोपुराणकथाश्रवं ॥२५॥ पुराणश्रवणेनासाधुनाभेनपुत्र
कः ॥ वैराग्यंचसमुत्पन्नेभवपाशविमोचनं ॥२६॥ सृष्टिकर्तृप्रभावंयःशृणुतेपापपुनोनरः ॥ मुच्यतेपातकात्सर्वा

त्सत्यंसत्यंनसंशयः ॥२६॥ ॥ श्रीगणेशउवाच ॥ महादेवविरूपाक्षभक्तानुग्रहकारक ॥ मेकराणांचजातीनांउत्पत्तिंव
दसांप्रतं ॥२७॥ कस्मिन्कल्पेसमुत्पन्नाःकिंशीलाकीदृशलक्षणाः ॥ एवंवदतिगौरीशेव्याजहारवृषध्वजः ॥ महादेवोवाच
॥ शृणुपुत्रमहाप्राज्ञलोकानुग्रहकारकं ॥ मेकराणांचजातीनांवेनोनिगदतेनरः शृणु ॥२९॥ विप्रान्महाबलिक्षत्रि ५०
यायादिशास्त्रियांशूद्रात्तोत्रष्टश्चशूद्रायांविषादेपार्षवोपिच ॥३०॥ माहिष्योग्रप्रजापत्यंविट्शूद्रोगात्वयोनयः ॥ अम्ब
ष्योकारणोवैदेपोदिनातेषांविविःस्मृतः ॥३१॥ अनुलोमवर्णषट्केचकथितंतेनवैनरा ब्राह्मणात्क्षत्रियाशूद्रावैश्यात्
स्मृतः ॥३२॥ शूद्राज्जातस्तुचोग्रोसर्वधर्मबहिष्कृतः ॥ क्षत्रियामागधंवैश्यात्शूद्रान्क्षत्तारमेवच ॥३३॥ शूद्रादायोग ५
वंवैश्याज्जनयामासवैसुतं ॥ प्रतिलोम्यंवर्णषट्कंकथितंतवमानद ॥३४॥ येषांकर्माणिसर्वाणिकथयामिसमासतः ॥ श्रो
तव्यमिचतान्सेवव्यवहारस्यसाध्वयः ॥३५॥ क्षत्रियाविप्रसंयोगाज्जातामूर्धवसिक्तकः ॥ राजान्यक्षत्रधर्मेणजीविकःसंप्र
कीर्तिताः ॥३६॥ वैश्यात्तुद्विजसंसर्गाद्वैश्यादनुलोमतः ॥ अम्बष्ठोवैद्यजातीयोषट्कर्माधिकःस्मृतः ॥३७॥ षट्
कर्मपरिवर्तिवर्तकस्मृतः ॥ नरवाजिगजानीतोचिकात्तुतस्यजीविकः ॥३८॥ शूद्रायांवैश्यमारोप्यब्राह्मणस्य

कर्मणैवेत्याज्ञानत्रह्मधर्मेणतप्यतेसवैस्कृतात्॥२९॥महाशूद्रइतिख्यातःशूद्रेभ्यःकिंचिदुत्तमः॥सुवर्णकारस्तस्यस्त्री
नेयोत्रैपवित्रकं॥४०॥शौचंशूद्रस्यधर्मेणवर्तनेनतस्यचस्मृतं॥वैश्यायांक्षत्रियाज्जातोमाहिषस्त्वनुलोमतः॥४१॥
श्वपाकोगणश्चैवस्मृतःपरिकीर्वतः॥व्रतबंधादिकानस्यक्रियास्कःसकलाविदुः॥४२॥शौनिषशकुनेशास्त्रं
स्वशास्त्रंस्वशास्त्रंचोपजीविका॥मुगंधेवनिताक्तंगंधतांबूलभोजनं॥४३॥शूद्यांचकुक्कुटंचैवभोगाष्टकमुदाहृ
तं॥शूद्रायांक्षत्रियायूग्रक्रूरकर्माप्रजायते॥४४॥शस्त्रविद्यामुकुत्रलेसंग्रामकुशलोभवेत्॥तयावृत्तिंसमाचरते
शूद्रधर्मोप्रजायते॥४५॥शस्त्रवितानकुशलःसंग्रामकुशलोभवेत्॥रजपूतइतिख्यातोयुद्धकर्मविशारदः॥४६॥
वैश्यधर्मेणशूद्रायांजातोवैतालिकोभिधः॥चारणोमागधोपिभवेत्सुतोवृषलधर्मतः॥४७॥राज्ञांस्त्रीणांचगुण
वर्णनतत्परः॥संगितेकामशास्त्रंचजीविकात्स्यवैस्मृता॥४८॥अनुलोमस्यषट्कंतुमाहिषेनतवबालकाः॥प्रतिलो
मस्यकर्माणिकथयामिसमासतः॥४९॥ब्राह्मण्यांक्षत्रियात्सूतप्रतिलोमेनजायते॥क्षत्रियाणांमसौकर्मक
र्तुमर्हत्सरोषतः॥५०॥किंचित्क्षत्रियजातिभ्योनूनंतत्स्यविधीयते॥गजबंधनमश्वानांवृत्तेनकर्मसारथेः॥५१॥

ब्राह्मण्यांजायतेवैश्यादैवज्ञोहिकथिधः॥रूपान्तुरक्षणंकुर्यात्तुरंगानमुमितोहरन्॥५२॥सामान्यंवनितायोषे
तासोमानिचजीविका॥तस्योक्तशूद्रधर्माणांनाधिकारोस्तिकर्हिचि॥५३॥पण्यागनासुतानेचकुर्यात्संगतिमी
श्वरः॥रूपजीवासुतानेषांनिर्णीयत्संगताविदुः॥५४॥ब्राह्मण्यांशूद्रवर्णस्तुजातोश्वपाकसंज्ञकः॥सर्वेषामेव
मतत्स्पर्शात्सर्वेर्जमाचरेत्॥५५॥सर्वसंस्पर्शगंबात्येसवधर्मबहिष्कृतः॥एवंचालेनबकुधाविधिर्धर्मासिनासि
नेः॥५६॥तेषांवस्त्रादिलेकारोजीविकातस्यवैस्मृता॥क्षत्रियायामसंदेवैवैश्याज्जनयामासवैस्कृताख्यं॥संवरीजनइ
त्युक्तंब्रह्मबंधविवर्जितः॥शूद्रेणोक्तंकिंचित्तत्स्मृतावनमुच्यते॥५८॥कथालंकारयाथादिषड्जाकासुवि
ख्यातारदः॥गाथपद्यादिछित्राणिविमूढाविमहीजनाः॥५९॥कालिकायाश्चमल्लाश्चखागमेचविलक्षणेः॥क्षत्रि
णशूद्रसंयोगात्सनारेजनयात्सुतः॥६०॥निषादइतिविख्यातोसर्वधर्मबहिष्कृतः॥शूद्रद्वारविहीनश्चपापाधिनि
रतःसदा॥६१॥वागुरापाशहस्तश्चमृगबंधनकौसलः॥अरण्येपशुहंताचोग्रंतकश्चवनेचरः॥६२॥क्रोधा
त्तिलोमात्रवत्यानयाजीवेत्सदैवहि॥घंटाजालादिकंकुर्यात्रात्रौविसस्मृतिकारणं॥६३॥दिधापापिरयोक्तोम

सूद्रद्विजेनमिहा॥विक्रयंमैथुनंकृत्वानमिहोत्सवतत्परे॥६४॥वैश्यस्त्रीशूद्रसंयोगात्पादयोगस्त्ववसेतक॥शूद्रादि
जातिधर्मेणपाषाणाद्दुष्कर्मकृत्॥६५॥सकुर्याकुटिमंसूरिचूर्णेवास्येहजातिकाभिन्यादिकर्मकुर्वीतरुक्मिनि
महाश्रमः॥६६॥एवंजातीयधर्माश्चसमासात्कथितामया॥अन्येषुचनवेजातेविस्तरात्कश्चतेकिल॥६७॥
वेसकरजातीयंमहात्म्यंशृणुयान्नरः॥मुच्यतेसर्वपापेभ्योमुक्तिमुक्तिंचविंदति॥६८॥ ॥इतिश्रीसत्यादि
खंडेद्विजगणेशसंवादेसंकरजातीवर्णनेनामचतुर्विंशोध्यायः॥ २४॥ ॥७॥ ॥

श्रीगणेशायनमः श्रीमहादेवउवाच अतःपरंप्रवक्ष्यामिमाहात्म्यंश्रुतिसंमतं गाठरीचप्रभृणंचअ
त्यंतंकथयामितेऽ १ ब्रह्मणोनामसोमित्रोकश्यपात्मुनेश्वरा कश्यपश्यसुतश्रीमान्सूर्योभास्व
न्खगस्तभुः २ अगच्छद्भूर्जगत्यामविश्वसाक्षीसहस्रपात् वेदस्तोमनुतस्मात्सूर्यास्तमत्रभा
क्किला॥३॥तस्मिंकुलेसमुत्पन्नोदिलीपइतिविश्रुतः मान्योवदान्यश्शूरश्चसत्यवादीजितेंद्रि
यः ४ दिलीपातुरथुजस्तेनस्माद्दिलिंइतिस्मृतः अजादशरथोजातोतत्सुतोरामइत्यभूत् ५
रामात्कुशःकुशाज्जेत्यतिथिर्नामभूपतिः अतिथेर्निधिजीतेननभःशब्दोतोद्यभूत् ६ पुं
डरीकतोजतेक्षमधन्वाततःस्मृतः देवानीकस्ततोह्यासीत्वासीनामचतत्सुतः ७ स्तोराज
स्ततोजातोशीलस्तस्मुतस्त्यभूत् उमामतस्कतोजतेवज्रनामस्ततःपरं ८ खंडनस्तस्सुतोह्या
सिताश्वतःतत्सुतःपरं तस्माद्विश्वसमश्चासीत्ब्रह्मण्योधार्मिकःसुधीः ९ हिरण्यनाभइ
तिनेस्तत्सुतःसमकीर्तितः १० कोशल्यस्तत्सुतोजज्ञेतस्मात्सोमसुतःप्रभुः ११ ब्रह्मीष्ठश्चा

मजस्तस्यपुष्यतत्सुतश्चाभवत् तस्मात्सुदर्शनोनाम्याम्निर्वाणस्ततःस्मृतः ११ तस्यवक्षोरुपेजज्ञे
अग्निवातीतिरितिः अपुत्रःसोपवसतापुत्रार्थंयत्नवानभूत् १२ ऋषीणांसाग्निनीकृत्वापुत्रे
ष्टीकृतवानिति सर्वस्वदक्षिणान्तत्रब्राह्मणेभ्यःप्रदत्तवान् १३ नारायणप्रसन्नोभूद्वाक्यमे
तदुवाचह भृगुःप्रसन्नःकर्तव्यःसतेपुत्रंप्रदास्यति १४ भृगुप्रसादितोतेनविचारंकृतवा
निति समीपस्थामुनीश्चेमान्द्वादशादित्यसन्निभान् १५ उत्थाप्यतदास्यामिचैषांकोपोभ
वेदतः तावद्भिर्मुनिभिस्तावद्वाचयामासवैमन्त्रान् १६ मंत्रान्द्वादशसंख्याकान्दापयामासवै
मुनीन् तेमंत्राऋषिकर्त्रेस्तातान्मुनीन्प्रप्रवीमिते १७ भारद्वाजःपूतमाषोवसिष्ठःकश्यपः
स्मृतः हरितोरौप्यविश्वश्चतथाब्रह्मजनार्दनः १८ सानल्यःकौडिनश्चैवमांडव्यःकौशिक
स्तथा विश्वामित्रऋषीश्चेद्वादशास्त्रप्रकीर्तितः १९ मुनिप्रणितमंत्रास्तेतेषांवैदेवताश्शृणु
प्रभावतीकात्यिकाचचंडिकाचततःस्मृताः २० महालक्ष्मीरितिप्रोक्तातथायोगेश्वरीतिच इं

द्राणीचैवकामाक्षीह्रीकवीराविकास्तथा २१ माहेश्वरीतथादुर्गालिरिताह्यनुपूर्वशः अनुजोदैविक
श्चैवशृण्वेतुपर्णकः २२ जयसुश्रीर्भृगुर्मसुमतःकौंडिण्यस्तथा मांडुकःकुंचिकश्चैवमांडव्य
स्ततःस्मृतः २३ भारद्वाजकुलीनश्चयुक्तिमुक्तस्यधीमतां प्रभोदेयाध्यदेयाश्चधार्मिकस्यादृशस्य
च २४ अरवल्लनुजस्यविस्तारंप्रब्रवीम्यहं अनुजस्यत्रयःपुत्राकृपायस्तस्ततोभवत् २५
वेहव्राणीततःश्रोक्तोसिप्रियसाध्यंततःपरं तस्कैस्मोधार्पिजोजातोकंकणस्यततःपरं २६ मं
गल्यश्चउणश्चैवधृष्टबीजश्चतत्सुतः भाषितस्तत्सुतोतेयेदृश्यतेअनुजास्मृताः २७ कालिका
यश्चभक्तस्यपूतमासमुनेःकुले जातस्यदेवकस्याथविस्तारंप्रब्रवीम्यहं २८ देवकस्यसुतोग्रो
क्षोहिरण्यरतिनामतः तस्मात्सुतंतुनाम्नाश्चरेवतश्चततःपरं २९ जयवंतस्ततःप्रोक्तस्तस्मा
दुष्टजयीनृपः सुरभश्चततोतेयेसुतंतुश्चनतःपरं ३० सारंगस्तत्सुतोतेयेसांगाह्वलक्ष्म
लनान् धनदस्तस्ततोग्रोक्तोयुधाजिश्चततःपरं ३१ पूर्वपस्यकुलेचेतेजातःपरमधर्मिकः

चंडिकायाश्चमत्कृत्यवसिष्ठस्यमहामुने ३२ भोत्रवंशस्यचरथौर्वीसांप्रतंकुरुसत्तम
पूर्योभूषणभूपालोरंतिश्चतत:परं ३३ रतीनाथस्ततोज्ञेयोरतिकालस्ततःपरं वाप्रि
ष्टःपार्थिवज्ञेयाचंडिकाकुलदेवत: ३४ कश्यपप्रयमुनेर्गोत्रेरूपार्थेनृपस्यच महाल
क्ष्म्याःपरंपत्र्यंसेवितस्यमहात्मन: ३५ ब्रवीमिवंशविस्तारंगुणगौरवमादरात् कृतुप
र्णाद्विरूणकोबारुणिश्चततःपरं ३६ तस्माच्चगोपतिर्ज्ञेयोधृतधन्वाततःपरं त्रिलोरं
ध्रस्ततोज्ञेयोतत्सुत:पुत्रवानिति ३७ सिंधुपूर्णस्ततोज्ञेयोअपांगश्चततःपरं शंखप्ये
रिस्ततोज्ञेयोभद्रपाणिस्ततःपरं ३८ कश्यपात्कृतुपर्णश्चमहालक्ष्मिप्रवंशक: ह
रिस्तस्याद्विषिवंरोजयनाज्ज्ञातभूपते: ३९ योगेश्वरीसेवितस्यवंशान्यूहंब्रवीमिते
जयातुपोटुकोराजातस्माद्दंडइतीरित: ४० दंडाश्वरथमनोज्ञेयोदीर्घवुधिस्ततःपरं खी
णीजयनतत्स्तोभूलांघुलततःपरं ४१ शार्दूलश्चततोज्ञेयोगोपालश्चततःस्मृत: योगे

DR BHAU DAJI MEMORIAL डाक्टर भाऊदाजीस्मारकसंग्रहालय

श्वर्यप्रसादस्तस्तहरितोजयनामक: ४२ पांचजन्यततोज्ञेयोमासुरिश्चततःपरं ४३ कथि
तास्तेमयापुत्रनानाशास्त्रविशारद: कृष्णविष्णुमुनिश्रेष्ठाद्वंद्वाणीनामदेवता ४५ सुधी
मूत्रपतीज्ञेयोतत्स्वंशंवदामिते सुशिष्योयातथामश्चयुधामन्युस्ततःपरं ४६ दृढयु
धिस्ततोज्ञेयोमितिवुधिस्ततःपरं कंदुकश्चततःप्रोक्तोसारंगश्चततःस्मृत: ४७ वुधिविष्णु
श्चद्वंद्वाण्याशशिभुनामकाष्टधा: कथितास्तेमहाबुधेतन्यानिगदितःशृणु ४८ कामाभिदे
वतायत्रमुनिब्रह्मजनार्दन: सौदासवामकोराजातस्यवंशान्ववदामिते ४९ सौदासात्भद्र
पीठश्चहारहंतस्ततःपरं गुणविष्णुस्ततोज्ञेयोकाममालिस्ततःपरं ५० बनायुजस्ततोज्ञेयो
योगमालिस्ततःपरं परंगतिवंशावैभूपावृजजनार्दन: ५१ सोबल्यऋषिवर्यश्चस्वैक
वीराचदेवता: तस्माच्छंकलिकोराजासुमंतोनामतःपरं ५२ सुमंतुनामकोराजातस्यवंश
ब्रवीमिते सुमंतोसुभयोराजामातंगश्चततःपरं मातंगान्मधुयोपश्चमधुयोघाद्दनंदमः५

धनेदमान्मार्गणश्चमार्गणान्निबोधत ५५ तस्माज्जंकक्लिकेराजाकुंभयोगीततःपरं भ
द्रहर्षस्ततोजज्ञेवत्सस्यनाभस्ततःपरं ५६ वत्सनाभीदिवर्णश्चनैगमश्चमहाबलः मनोकोना
मभूपालोरणजीवश्चतत्सुतः ५७ सोमल्यास्लकवीरायाभक्तः सोमंततःस्मृतः कौंड
ल्यानांविकायाश्चकौंडिनस्यत्रवीमिते ५८ कुंडिनद्वृष्टपाणिश्चसागरश्चततःस्मृतः॥
एवंपरंपराप्राप्तराजानःशुभलक्षणं ५९ मांडव्योतुमिकर्षश्चमरुत्वर्याश्चसेवकाः मंडू
कवंशजातावैतानहंवच्मिसांप्रतं ६० मंडूकाज्जठरीभूतेजाठरोर्षजांधलः तत्पुत्रपौ
त्रविज्ञेयाःशंखादिगुणसंयुताः ६१ कौषिकश्चमुनिश्रेष्ठोदुर्गादेवीस्तथैवच कुशिको
राजवर्यश्चतस्यवंशंवदामिते ६२ कुशिकान्नसुषोराजानहुषाज्जांगलिस्तथा जागले
श्चसुतःसौभकुंडिनश्चततःपरं ६३ कथितःकौशिकादुर्गाब्राह्मण्याराजसत्तमः विश्वा
मित्रस्यगोत्रत्वंतरितारैवतातथा ६४ मानेरिनामकोभूपोवर्णयामिसमासतः मांडव्य

चेटपरंभुतस्माद्गीरथस्तथा ६५ वर्णितास्तवराजानसान्वयाश्चमदैवतः तेषांचवर्णवि
स्तारस्त्वपुत्रत्वानुवर्ण्यते ६७ तेषांपुत्राश्चपौत्राश्चप्रस्तावैमहीतले कथितंतेमयाव्या
समाहात्म्यंवंशसंभवं ६८ एतत्श्रवणमात्रेणसर्वपापैःप्रमुच्यते अपुत्रःपुत्रवाप्नोति
निर्धनोधनवान्भवेत् ६९ इतिश्रीसह्याद्रिखंडेगणेशेश्वरसंवादेक्षत्रियउत्पत्तिकथ
नंनामैकोनत्रिंशोध्यायः॥२९॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

श्रीगणेशउवाच ॥ विघ्नेश्वरजगन्नाथभक्तानुग्रहकारक ॥ पापहारीयदनिशंश्रोतुंकारणंवदसांप्रतं ॥ १ ॥ गणेशवचनंश्रुत्वाजगादवृषवाहनः गजवक्त्रमहाप्राज्ञकारणंशृणुसांप्रतं ॥ २ ॥ श्रीमहादेवउवाच ॥ कदाचित्तीर्थयात्रायांनिमित्तेनसमाययौ सान्वयोल्हापतिर्भूपोयेष्ठनंपठनंतदा ॥ ३ ॥ तीर्थयात्राविधिस्तेनयथाशास्त्रमुनिष्ठितः ॥ तुलापुरुषदानादिकृतंतेनमहात्मना ॥ ४ ॥ भृगुस्तत्रेष्टितंदृष्ट्वाकोपयावंवभूवह ॥ राजश्रीयामदान्मत्तंराजानंशापमाददे ॥ ५ ॥ पूर्वापकारणंमेतुंदुष्टनस्मरसिप्रभो ॥ तस्मात्वंराज्यहीनोभूर्वंशनाशोभविष्यति ॥ ६ ॥ एवंशप्तस्तदातेनमुनिनाराजसत्तमः ॥ आत्मानंसापराधंवैज्ञात्वातंशरणंययौ ॥ ॐ नमोविघ्नराजाय सर्वसिद्धिप्रदायिने ॥ स्मरारिसुतसर्वज्ञविघ्नंमेनाशयिष्यति ॥ ७ ॥ इतिमंत्रंजपन्भक्त्यातपस्तेपेसुदारुणं ॥ दशवर्षसहस्राणिजलवायुफलाशनः ॥ ८ ॥ ततस्तुष्टोगणाधीशोवरंतस्मैददौतदा ॥ ९ ॥ अतस्त्वमपराधंमेक्षंतुमर्हसिभोमुने ॥ विघ्नेशोपिसंतुष्टोवरंस्वयंछेतुमसांप्रतं ॥ १० ॥ इतिवाक्यंसमाकर्ण्यमु

निःसंतुष्टमानसः॥तमुवाचमुनिश्रेष्ठोराजानंदीनतत्परं ॥९२॥राजन्ममेदृथाशीर्वैभविष्यतिनसंशयः॥त्वंचछरणमापन्नोवशावधिर्भुविष्यसि॥९३॥त्वदृराजाश्वराजानोनिर्जीर्याराजहीनतः॥अद्यप्रभृतितेवंशेलीपिकाजीवनंभवेत्॥९४॥पठनेपालनेशक्तामयाकोपवशात्किल॥भषाहरीयाप्रसिद्धास्तेपतनाख्याभवंतुवः॥९५॥अभूत्परंतेषांपतनाभवश्चयं॥श्रुत्वाऋषिवर्योसौजगामनिजमाश्रयं॥९६॥इत्येतत्कथितंतातगजाननमहामते॥अकथ्यमपितेख्यातंकिमन्यद्ब्रोतुमिछसि॥९७॥इतिश्रीसह्याद्रिखंडेशिवगणेशसंवादेषाठरीयक्षत्रयातीकथनंनामषट्त्रिंशोध्यायः॥३६॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥ ८१

॥श्रीगणेशायनमः॥ ॥श्रीगणेशउवाच॥ ॥त्रिवर्शोमहादेवमकृतानुग्रहंकारक॥पूर्वंऋचेमयातातभार्गवेणपुराकिल॥१॥कृतानिसत्रयोपाख्यानकथंतेषांपुनर्जनी॥एतन्मेसंशयंनाथपुराकर्तुंत्वमर्हसि॥२॥ ॥त्रिवज्र उवाच॥रहस्यंसत्यमेवंतातरेवानामपिनऋतं॥ततुतेकीर्तयिष्यामिनमस्कृत्यस्वयंभुवे॥३॥त्रिःसप्तकृत्वःपृथिवीकृतानिक्षत्रियैःपुरा॥जामदग्न्यात्तपसेयेमहेंद्रेपर्वतोत्तमे॥४॥तदानिःक्षत्रियेलोकेभार्गवेणकृतेसति॥ब्राह्मणान्क्षत्रियास्तातगर्भार्थिन्योह्यचक्रमुः॥५॥तानिःसहसमाप्येतुब्राह्मणाश्शंसितव्रताः॥ऋतवस्तौनवद्युमान्कामानानन्तोतथा॥६॥तेक्षत्रक्लोभिरेगर्भान्क्षत्रियास्तासहस्रशः॥ततःसुषुविरेपुत्रक्षत्रियावीर्यसंमताः॥७॥कुमारांश्चकुमारीश्चपुनःसत्रमिरक्षयः॥एवंतद्ब्राह्मणाःसर्वेक्षत्रियाःकृतपत्तिभिः॥८॥ब्राह्मतेदृढंचधर्मेणसुरार्थेनसमन्वितः॥चत्वारापितरावर्णाबभूवुर्ब्राह्मणोत्तरः॥९॥ब्रह्मक्षत्रौनारीतकामानानन्तोतथा॥तेषांवृत्तानिवृत्तानिनियोगानिगतानिच॥१०॥कृतोहारागकृतंतिनदास्यचतुरोन्नमेः॥राजपत्न्यास्तथाकश्चित्वेधूरूत्वाचितांविशन्॥११॥कश्चित्ब्राह्मणकुलेषुश्रद्धावंकश्चनमनुः॥ऋषिभिरक्षिताश्रामन्ततःसपुरिप्रजाः॥२

ततोवंधुत्वधर्मेणसहस्रशतनाविनः॥प्रजानांश्रात्मवद्भावंधर्मकृत्यपुरायणः॥१॥अधिविद्यादिभिश्चैवविधुक्तंस
र्वतोनरः॥च्चयोमासाग्रेपेतोवंपुत्रकनहेविले॥अथनिष्ठतुनस्तत्रसशैलवनकानने॥प्रशंसनिपुनःस्तत्रेधर्मणयो
वक्रधरःशास्त्रणाद्यास्ततोवर्णालेभिरेमुदपुनर्मं॥५॥कामक्रोधोऽवान्दोषान्निरस्यचतनाधिपः॥दंडेदद्योपुध
र्मेणप्रयंतेतोऽपालयन्॥६॥अथधर्मेपरेस्तेत्रेसहस्राशःशतक्रतुः॥तत्रेश्वाकोश्चवर्षेणाप्याप्यायात्मजाः
॥७॥नबालयेश्रियेनहितदाकश्चित्त्यजाननः॥नचस्त्रियेप्रजानातिकश्चिरेश्राप्यौवनं॥८॥नायमायुनवनाभिश्च
नाभिश्चयज्ञानन॥९॥यंसागरपर्यंतासमाप्तपुर्यंतमेदिनी॥१०॥इक्षिरेचमहाराजतेःक्षत्रियाबहुरक्षिणेः॥सांगोपनि
षदान्वेदान्विद्याश्चाधीयतेतदा॥११॥नहिक्रीयतेब्रह्मन्ब्राह्मणैश्चतदाकिल॥नचसूद्रसमाश्चासेवेरानुज्ञा
रयेत्पुनः॥१२॥कारयेतक्रीषागोभिःतदस्याःक्षत्रवाधुरि॥१३॥ ॥ ॥इतिश्रीसत्याद्रिखंडेक्षत्रिय ८२
त्पतिनामसत्पविंशोध्यायः॥२७॥ ॥श्रीसरस्वतीवायनमः॥ ॥श्रीरस्तु॥

॥श्रीगणेशायनमः॥ ॥श्रीगणेशउवाच॥देवदेवजगन्नाथभक्तानुग्रहकारक॥ब्रह्मयोक्तिमहादेवछंतुमर्हस
ऋषतः॥त्वयाप्रोक्तेसूर्यवंशेमेऽत्रादिश्रीविशेषतः॥अतःपरंमहादेवचंद्रवंशंविनिर्णयं॥२॥वक्तुमर्हस्यशेष
णभक्तानुग्रहकारक॥त्वमेवजगतांनाथोआत्मनांप्रतिबोधकः॥३॥लेकर्तारहिप्रजानांचसंहर्तारिसत्तमा
॥पुराणपुरुषेनित्येवक्तानबंधमोचने॥४॥कथ्यतांप्रसादेनमहेश्वरमहाप्रभो॥ ॥महादेवउवाच॥शृणुव
त्सप्रवक्ष्यामिचंद्रवंशंसविस्तरं॥५॥यंश्रुत्वावंशवर्यंहिविस्मयोजायतेनृणां॥चंद्रवंशेमहाबाहरत्रिनघुदयो
नृपः॥तंवंशंचवदिष्यामिनवाग्रेश्रृणुवक्त्रक॥नकस्यापिमयाप्रोक्तंकारणंवंशनिर्णय॥७॥शेदितेश्रवणेबुद्धि
वक्रुमिच्छामिमारुत॥ब्रह्मिकेकस्यपेनाशेयत्रत्रिरमुसरः॥विधुतेजसमंलोकेजातोवित्तपसापुरा॥त्रिभि
स्त्रिचक्षुसमुत्पन्नोतेजसांपतिरीश्वरः॥त्रात्रेयदेहिलोकानांऔषधानांचपोषकः॥तात्पर्यस्यवलस्तोपिचंद्रम्ना
मानिविश्रुताः॥१०॥ततपत्नीरूपेणेनागणानाम्नारूपागनाशुभा॥तस्यांहिनिर्मितःपुत्रोरूपेणवर्णसंयुतः॥११
वरान्नादीरजाधारोवरकर्मावरानतः॥नाम्नाबुधेधरनिख्यातोबुधानांचोधनात्मकः॥१२॥पुराणेषुचसर्वेषुवि

श्रुतोवरदेविभुःजानतसुतेश्रीमत्वंशेशेषपुरूरवामहामतीः॥२३॥पुरूरवासुतश्चभूतोश्रुतोश्रायुरित्यभूत्॥३॥श्चयु
र्वंमहतिख्यातोदामाकुशसमुद्भवः॥२४॥कुशाद्गानुःसमुत्पन्नोमानोःसोमहतिनृपः॥सोम्मन्तसिरीसनामाभूत्सि
रसक्तथनंजयः॥२५॥धनंजयातुमांगल्योकामराजस्ततोपरः॥कामस्यपंगुनामाभूत्कृतोरविहिमंडलः॥२६॥त
ईजेन्नपतिर्जातोवीर्यवांश्रसनानतनः॥धर्मीसेनातिरक्ष्यश्चसर्वजितपराक्रमः॥२७॥सर्वजितानातुरघुजोतसुतोभा
द्यभूपतिः॥माद्याद्युईदुभूपालोतत्कृतोवुध्युमिनि॥२८॥वुध्युश्चाथसोनतेधर्मात्कामइतिस्मृतः॥कामस्यतुकौत्रि
कोराजानसुतोरण्यसंज्ञकः॥२९॥तईक्ष्वाकुनागलाननः॥तईक्ष्वाकुनाथोभूत्ततसुतोईदुसंज्ञकः॥२
तत्कृतोकामपालोभूतईशोसखिलेपरि॥सखिलापमधोजेतेतत्सुतश्रुतिरीश्वरः॥३१॥तस्यभूषणभूपालोकृति
राजातुतत्कृतः॥कृतिराजकुलेचैवजातश्चपृथुभूपतिः॥३२॥तस्यवंशेनरोजन्तेकामवाविरिनः॥श्रपुत्रःसमवेप्राप्त
पुत्रार्थंयत्नवानभूत्॥३३॥ऋषिणासमिविकृत्यश्वमेधंयक्तवानयत्नः॥पुत्रइष्टिंततोपश्चात्सर्वस्वेष्टिणाहरिः॥३४॥
नारायणप्रसन्नोभूतवाक्यमेतदुवाचह॥नारायणमुखेनैवमंत्रेणास्युपदेशितवान्॥३५॥तेनमंत्रात्ऋषियुक्तामंत्रबीज

स्परेवताः॥महाऋषिसमंमत्रस्यमंत्रऋतिसमायुतः॥३६॥तेमंत्राऋषिवरोस्तानऋषीनप्रब्रवीमितेः॥पराशरश्चवस
श्रेवगौतमकौडिण्यस्तथा॥३७॥मौनलाश्रंपकश्रेववशिष्ठःकश्यपस्तथा॥दिश्वामित्रश्चगुरात्रिभारद्वाजस्तथैवच॥३८॥
हिरण्योहरितश्रैवदेवराजऋषिस्तथा॥लुकुंजोश्रंगिरोसोमसंवर्तश्चोतथैवच॥३९॥षडऋषिकपायुश्चसुलऋषि
वचामरः॥मातंगोदीर्घऋषिश्चेतविश्वामित्रऋषेस्वरः॥४०॥रावणश्चसुतमाषीचजांबवोगणकोऋषिः॥वैरुसौवै
नतश्चैवनलमरुत्तिश्चतापसः॥४१॥मावनसोमाऋषिश्चैवनानामाभिदुंदुभिः॥हविलोमोपिऋषिश्चैवमैत्रपश्चैवमंउने
॥४२॥बकदाल्भ्योमहर्षेकुमारोमानिरुक्तथा॥मालिवंतऋषिश्चैवश्रृंगीसोऋषिसत्तमा॥४३॥मुद्गलोपारिजातश्च
ऋषिरामोदरस्तथा॥सात्यमनश्चऋषिश्चेतोपर्धपश्चमहाऋषिः॥४४॥चारणासेउग्रऋषिश्चैवेऋषिर्भावनः॥सोमे
कांतोमामऋषिचामकःप्रातरत्यपि॥४५॥मुनिप्रणितमंत्रास्तेतेषांवेदेवताश्रृणु॥४६॥योगेश्वरिमहालक्ष्मीएकवीरा
कालिका॥कुमारीचैवकामस्तीश्रंबिकाचसरस्वति॥उमादुर्गेश्वरीचैवचंडिताहिरण्यिका॥चेष्टिकारेणुकाचैवमहा
कालीचतारकाश्रृण॥ईशानीवज्रणीचैवब्राह्मीयमावतीतथा॥नीलांबाचैवकोलांबाश्रंबानागेश्वरीतथा॥४९॥रक्तदं

DARSHAN DAJI MEMORIAL

ईरितः॥२७॥ऋक्षनाभुतत्सनोजनेतत्सुनोकर्मुकेतिच॥तस्यवंशेनरपोजनेतःपिंडिराजामहाप्रतिः॥२८॥तस्यवंशेमहाजने
स्त्रुवकोनामराजन्यश्चकः॥तस्यपुत्रोततश्चशमुजनेतिच॥२९॥शमुकश्चैपकोराजातत्पुत्रेश्वीधरेतिच॥श्री
धरात्कामराजाभूत्तत्पुत्रोमानुजोनरपः॥३०॥मानुजाच्चैवमार्त्तेरोमार्त्तराकालिनप्रभुः॥कालिनाद्वुक्योराजातत्पुत्रो
भासभासनः॥३१॥भासातुमासिकोभूपोतत्सुतोतिकपामलः॥तदंशेनरपतिर्जनेहिमवंतोनरोत्तमः॥३२
हिमवंतात्तुभोजश्चभोज्याद्दुष्टपोभवत्॥तस्यवंशेमहाधारःसात्विकीतिचनामतः॥३३॥पद्मावत्यांचपद्मस्य
सोनत्सस्यमुनेकुले॥तातोप्रथमभूपालेतत्सुतोभामभूपतिः॥३४॥भ्रमणाभंडनोराजामंडनान्सिंहकेनर
पःसिंहकाद्धरिनतेभूत्तत्सुतोमानधेतिच॥३५सोमश्चवातनोतत्तेवाममाणिनतःपरं॥तत्सुतोधार्मिको
राजाज्येष्ठसद्बुद्धिवीर्यवान्॥३६॥तस्यवंशेनरोजनेतेरवानामभूपतिः॥कोसिंबतत्सुतोराजातत्सुत्रोयाति ८५
भूपतिः॥३७॥कुमारिकायांभक्षस्यवंपकस्यमुनेःकुले॥प्रथमश्चंपकोराजातत्सुतोनामभूपतिः॥३८॥धाम्न
स्करथोराजातत्सुतोप्रागदत्यभत्॥प्रागात्मारायणोभूपातत्सुतोरागमंडनः॥३९॥नागात्तरसिंहभूपा

लोतत्सुतोगात्रवर्माघणः॥श्रीमंतस्तत्सुतोजनेतत्सुत्रोमायवायकः॥४१गामपूरमंडनोजातोतत्सुत्रोजीवनेतिच॥४२भन्यो
तत्सुतोभूत्तत्सुतःश्रीरपालकः॥४३॥तस्मैचतत्सुतस्तत्सुतोभूत्भूगुराजाचतत्सुतः॥भृगुर्भोजेतिराजाभूत्तद्वंशेरंगभूपतिः
४४॥तद्वंशेनरपोजनेतेशर्ङ्गनामेतिविश्रुतः॥भृगुर्भोजेतिराजाभूत्तद्वंशेरंगभूपतिः॥४५॥तद्वंशेनरपोजनेतेशर्ङ्गनामेति
विश्रुतः॥शार्ङ्गनामासुतःश्रीमान्तत्सुतोसुरथेतिच॥४७॥हिमवराजातनोजनेसामर्थ्यइतितत्सुतः॥सामर्थ्यात्सृंग
गिरिराजाभूत्सृंगारोइतितत्सुतः॥४८॥तस्यवंशेमहाराजानाम्नापरिक्षितीरितः॥तस्यवंशेनरपोजनेकामास
नेभूपतिः॥४९॥कामासान्सारिराजातत्सुतोबलवीनितः॥तस्यवंशेमहावीरोभूपतिःकामपायकः॥५०॥काम्या
त्सुदर्शनोनामतत्सुतोहिरणेतिच॥तत्पुत्रोमित्रराजाभूत्तत्सुतोनामनिकेतनः॥५१॥कामासीरेवतोभक्षकल्प
पल्पमुनेकुलेप॥ज्ञातोवैश्यंईभूपालोतत्सुतोरूपथेतिच॥५२॥रूपथाद्रोधनोनाम्नातत्सुतोमालिवंतकःततपुत्रो
नामपालोभूत्तत्सुतोथरइंद्रितः॥५३॥श्रीरार्णकतत्सुतोभूत्ततपुत्रःस्वाक्षनेतिच॥प्रमाथिनामतद्वंशेनपुत्रो
रणभूनयः॥५४॥तस्यवंशेसुमाधाचतद्वंशात्सार्थिवोनरः॥सार्थिकाद्विक्रमोनामतत्पुत्रोगेलिनापतिः॥५५॥

तद्वंशेचसप्तमेमूतसुत्रोगंधिभूपतिः॥४८॥तस्यवंशेनपोजातेऐराक्षनरतीरितः॥४९॥तस्यवंशेनपोजातेतमराजइतीरितः॥सेमाद्रिर्नृपोजततसुत्रोपरमंजयः॥५०॥जगद्वंशकमस्तस्यवसिष्ठस्यमुनेःकुले॥प्रथमोनृपतिर्जातेनालानमहीपतिः॥५१॥तस्यवंशेनृपोजातोनिरंधकइतिस्मृतः॥निरंधर्यनृपोजातस्ततोभूमिनृपतिः॥५२॥ततसुत्रोबाहुकोराजातोनारायणाभिधः॥तस्यपुत्रःप्रेषणिःतत्कतोदाहिकोनृपः॥५३॥तस्यवंशेनृपोजातेसर्वाभूमंडलेनामभूपतिः॥मागधश्चकनृपोजातोततस्तोधारसंज्ञकः॥५४॥धीरात्तनृपतिर्जातोनतस्तोपाणिपद्मकः॥दिवकोननतःप्राप्यवंशोयंवंचविस्तरः॥५५॥ततोवंशःप्रतीलोम्याराजेम्याश्चतथैवच॥जातोवंशस्यविस्तारोयतच्चासंमहीतले॥५६॥ ॥ ॥इतिश्रीमत्पद्मखंडेश्रीविष्णुशर्मसंवादेव्यादिरहस्येसोमवंशोत्पत्तिकथनंनामैकोनत्रिंशतितमोध्यायः॥२९॥ ॥७॥ ॥ओंनमश्शिवायनमः॥ ॥श्रीरस्तु॥

श्रीगणेशायनमः श्रीईश्वरउवाच सरस्वत्यास्तटप्रस्थेविश्वामित्रमुनेःकुले जातःप्रथमभूप्रालोविद्युत्वनिरितीरितः १ तत्पुत्रोसोमराजाभूत्ततस्तोकलिनीनृपः तस्यवंशेनृपोजज्ञेभूषणोनामभूत्वभूत् २ भूषणात्सपिराजाभूत्सुत्रःसोमभूपतिः सोमात्सिंधुराजाभूत्तत्सुतोनागभूपतिः ३ सुमनातत्सुतोभोजाद्भोजेस्त्यांतयित्यभूत् भोजात्सुभ्रूषोनाआसुभ्रूषालंखमंडणः ४ समर्थस्तत्कतोजज्ञेत्रिवराजततोपरि तस्यवंशेनृपोजज्ञेकासाश्वरनिचस्मृतः ५ कामाक्षात्कृतिराजाभूत्तस्यवंशेसुपार्थिवः तस्मात्तुद्योततिर्जातोभुजाद्देवकोनृपः ६ देवकात्कोटिणोराजातसुत्रःसनातनः जीवराजंततःप्राप्यमष्टाय वंशविस्तरः ७ अनुलोमप्रतीलोम्याज्जातोवंशोभवेत्किल उमाभगुकुलेचैवजोनासुरश्च भूपतिः ८ सुरब्रह्माणिवेराजापार्थिवातानिनीनृपः तस्यवंशेनृपोजज्ञेउन्नाभोत्तमसोनृपः ९ उन्नाभात्सिंहभूपालोततदुंडोहयभूपतिः हयत्वंगिरसोराजातत्सुतोवारुकोनृपः ५०

बाहूकात्तीतराजाभूत्सकनेत्रश्चितत्सुतः २१ तद्वंशेभोजराजाभूत्तत्सुतोमालिमंडनः
मालिनादंतुपर्णोभूत्तत्सुतःकामभूपतिः २२ कामातुकश्यपोराजातत्सुतानहरितेतिच २३
पत्नेर्वागीश्वरीदेवीतत्कुलेरघुभूपतिः रघोस्तुमाधिभूपालोऽतेमधारीचतत्सुतः २४ तद्वंशे
द्रविणोराजातत्सुतोहेमपालकः तत्पुत्रोमित्रराजाभूत्तत्पुत्रोजयदेतिच २५ जयदात्का
र्मुकोराजाकार्मुकात्रणभूपतिः तद्वंशेनकुलेजातेविश्वेरंगजभूतलः २६ रागात्रथमभूपा
लोतत्सुतोगांगयेतिच तद्वंशेवेणुवंशोतितत्पुत्रोपार्थिवोनृपः २७ अत्रिवीगेश्वरीदेवीत
द्वंशेमागधोनृपः मागधस्तुमनोराजातत्पुत्रःश्वेतमंडुणः २८ तस्यवंशेनृपोजातेऐरावत
इतीरितः ऐरावतात्तृणराजातत्पुत्रोश्रमणोमतिच २९ श्रमणाद्धरिराजाभूत्तत्सुतोपांसुभू
पतिः तस्यवंशेनृपोजातेधात्रीराजाचवीर्यवान् ३० तस्यवंशेनृपोजातेकोंडण्यानामभूपतिः
कोंडण्यात्पार्थदेवोराजापवित्रस्तत्सुतःस्मृतः ३१ पवित्रात्क्षत्रराजाभूत्तत्सुतोपालकोऽपि च

पालकात्सिंहराजाभूत्तत्सुतःकाश्यपस्त्वभूत् ३२ तस्मात्तुभार्गवोराजातत्पुत्रःशैलनामकः
शैलात्सुवर्णनोनामतत्सुतोगांगभूपतिः ३३ तस्मात्तुभरोराजाभूत्तद्वंशेकमलाकरः तस्य
वंशेनृपोजातेमेरुनामामहानृपः ३४ तस्मात्तुपाटलोनामातत्सुतस्ताम्रनामकः तस्मात्तुस्थि
तिभूपालोतद्वंशेद्विजपालकः ३५ द्विजपालाश्वगोपालोगोपालायदुभूपतिः यदोश्चमाहिषो
राजातत्सुतोग्रामभूपतिः ३६ ग्रामात्सुचारणोनामधर्मराजस्ततःपरं तस्मात्तुजंगिनीराजा
तत्पुत्रःपुंगनामकः ३७ अत्रतेकथयिष्यामिइतिहासंपुरातनं पंगुराजानमुद्दिश्यकौतुह
लसमन्वितं ३८ पुरामेरुवनगरेऽक्षिनानामकोनृपः एकोनरशतंतस्यपत्नीनांरूपवद्भव
वेत् ३९ अपुत्रःसभवेद्राजाचिंताव्याकुलमानसः पुरोहितसमाहूयपुत्रेष्टीचकारयेत्
४० अहर्निशंज्येष्ठपत्न्यादेवीमंत्रेणपायितं ऋषिवाक्यमंत्रपिंडंतत्पुत्रःसभवेत्किल ४१
पूर्वकर्मविपाकेनपुत्रेष्वयममागतः राज्येनार्हसुतंज्ञात्वापुनश्चिंतापराकुलः ४२

मृत्युर्वैग्रासितंराजंस्तेकोवांभविष्यति इतिचिंतापरंभूपज्ञानकश्चिद्द्विजोत्तमः ३३ समाययौ
महातेजोज्ञानविज्ञानसंयुतः उपचारैःपूजइत्वर्तेराजाभक्तिसंयुतः ३४ चिंतार्तंनृपतिंदृष्ट्वा
पुत्रंदृष्ट्वातदग्रं उपायंकथयामासआगमोक्तंहिपुत्रदं ३५ राजंतेकथयाम्यद्यउपायंबहु
पुत्रदं पंगुपुत्रंवधिंत्वातुतन्मांसमंत्रसंयुतं ३६ सर्वस्त्रीभ्यःप्रदृष्ठंस्वंएकोतरशतंसुतः
भविष्यतिनसंदेहोसुखदाराज्यपालकाः ३७ राजाहृष्टमनोभूत्वाविप्रवाक्यानुसारतः
चकारपुत्रसंज्ञाताःपूर्वकर्मानुरोधतः पुत्रोत्पत्तौगहीनोभूद्व्यासांगात्वभूविरे ज्येष्ठंपुत्रं
पुरस्कृत्यराज्यंतेषांदहौनृपः ३९ योवृद्धाश्वसंज्ञातोकालधर्मंमुपागतः एतस्मिन्नंत
रेतत्रनारदःसमुपागतः ४० पूजितःपंगुनाराज्ञायथावृत्तमचोदयत् पर्यटन्ऊर्ध्वलोकां
श्चगतःसंयमिनीमहं ४१ तत्रतेनरकेघोरेपतंतंदृष्टवान्नृप बहुदुःखसमापन्नंदीर्घकालं
स्वकर्मणा ४२ इतितेकथितंत्वत्रचरणामान्यत्रवैमुनिः ऋषिवाक्येसमाकीर्ण्यराजाचिंता

परायणः ४३ मुनिनाहूयसत्कृत्यपृष्ठनरकोधृतिः कथंभूपान्नमपितुःइतिशंशरणागतः
४४ ऋषिर्मृगेंस्तदानीतुसोत्थायामासतंनृपं मात्रैस्त्वंनृपशार्दूलउपायंकथयामिते ४५
ब्राह्मणासमुपादिष्टंकामत्रंथीविमोचनं गयाश्राद्धादिकंसम्यक्कृत्वोत्सर्गादिकंतथा ४६
पितृंनुद्दिश्यकुर्वंतिनरकादुद्धरंतिते इतिवाक्यंसमाकर्ण्यराजाहर्षसमन्वितः ४७ इति
तेकथितंपुत्रपंचाख्यानमनुत्तमं तद्वंशवर्णयिष्यामिसावधानमनाशृणु ५० पंगोरासी
ज्ज्येष्ठराजातेजारण्यकोभवेत् तस्यवंशेनृपश्रेष्ठेनाम्नाराज्ञयइतिस्मृतः ५१ दाल्भ्या
च्चशीतिपालोभूत्कोतिराजस्ततःपरं सोमवंशेसमुद्भूताराजानोहिमहाबलाः ५२ शंतादा
तासभूराश्वलोकेविख्यातपौरुषाः ५३ इतिश्रीस्कंदपुराणेसह्याद्रिखंडेऽत्रिरहस्ये
शिवगणेशसंवादेसोमवंशोत्पत्तिकथनंनामत्रिंशतिमोध्यायः ॥३०॥

DR. BHAU DAJI
डाक्टर भाऊदाजी लाड पुरातत्त्वसंशोधनसंग्रहालय

श्रीगणेशायनमः श्रीमहादेवउवाच ललितस्यात्मभक्तस्यभारद्वाजमुनेःकुले जातःप्रथमभूपा लोऽहोलनामाहृतिपतिः १ हैलाश्वगाराजाभूतत्सुतोजीवनोनृपः जीवनात्तिवभूपालोऽतत्सुतोरं गभूपतिः २ तस्यवैरोचनेजज्ञेभास्करैतिचरैस्मृतः भास्कराद्भांडकोराजातत्सुतोपारिजात कः ३ पारिजातात्रपूर्वेद्युतत्सुतोमकरध्वजः मकरात्कालिनामाभूतत्सुतोऽरिनाशनः ४ तस्यवैरोचनेजज्ञेभार्गवोनामभूपतिः भार्गवातितिलीनामतत्सुतोमित्रहत्याभूत् ५ घृमस्त ङ्गराजोराजातेतानष्टान्वयोभवेत् तङ्गराजनृपतिर्जज्ञेऽतिलोतिचनामतः ६ वंशोविस्मारतो यातोकलौदुष्टोभवेत्किल हिरण्यक्षात्मभक्तस्यहिरण्याक्षऋषिःकलौ ७ जातोऽथम भूपालोमाननामाऽसुरक्षिक्रतः माननामसुनेतस्यतत्सुतोशरभेतिच ८ शरभात्कालदंष्ट्रश्चकालादिकस्मांतकः विकल्पात्कल्पतीतोभूत्तत्सुतोविश्वपालकः ९ तङ्गरोनृप तिर्जज्ञेभावनिर्नामविश्रुतः तङ्गरोवनृपोजानोनान्नाकैलासस्थपि १० ततोहिपद्मा

जाभूत्मालिवंश्यततःपरं तस्माच्चद्विमुखोराजातत्सुत्रोरंदुमंडणः ११ ततस्तश्रीधरोजातोपाण्डु
श्चतस्ततः १२ तत्सुतोकालिनामाभूत्सोमनामाचतत्सुतः १३ तस्यवंशेनृपोजज्ञेरावतरतीरितः
चेदिकायास्तभक्तस्यहरितस्यमुनेःकुले १४ जातःप्रथमभूपालोनाम्नाश्रीपतिरीरितः श्रीपतिर्हे
रिनामाभूत्तत्सुतोभीमभूपतिः १५ भीमाद्वैराटनामाभूत्कर्णराजाततःपरं कर्णात्सुपर्णराजाभू
त्ततस्ततोऽयुत्यभूत् १६ तस्यातुदमनोराजातस्माद्धामोदरेतिच तस्यवंशेनृपोजज्ञेत्रंबको
नामभूपतिः १७ तस्माच्चधार्मिकोराजातसुत्रोगौरधार्मिकः गौरबाद्वैपनिर्जातोततस्तोमालि
मंडणः १८ तस्यवंशेनृपोजज्ञेहिरण्याक्षरतीरितः हिरण्याक्षोत्रिकोजातोतत्सुत्रोसुरथेतिच
१९ सुरथात्तुमहीपालोततस्तोवुधनामकः रेणुकायाश्चभक्तस्यदेवराजामुनेःकुले २० जा
तःप्रथमभूपालोशैलनामेतिविश्रुतः शैलात्तुशीलनामातत्ततोपद्मभूपतिः २१ तस्यवं
शेनृपोजज्ञेदेवकीनामरत्नभूत् तस्माच्चक्रतुपर्णोभूत्तत्सुत्रोभाजनामकः २२ तस्माच्छिव

करोनाममालिवंश्यततःपरं तस्माच्चहरिवंशोभूत्ततस्तुत्रोभोजगेतिच २३ मालिवंश्यमनुष्या
व्यनशेभूद्वंशविस्तरः माहाकाल्याश्चभक्तस्यभूचेड्याश्चमुनेःकुले २४ जातःप्रथमतोराजा
नकुलोनामवीर्यवान् नकुलाद्भीमनाभूत्तस्मात्पांडूनृपोभवत् २५ पांडोपृथुश्रवाजातोततस्तोभू
रिनामकः तस्माच्चसोमराजाभद्विर्योदार्यसमन्वितः २६ तस्यवंशेनृपोजातोकामाक्षरतिवि
श्रुतः कामाक्षादूरवर्णोभूतस्माद्वृष्ण्वाद्रति २७ ततोभूद्रतिपर्णीतिराजासत्यपरायणः
महाविद्योभवित्तस्यासत्यवादीजितेंद्रियः २७ सत्यसेनततःपश्चात्ततोवैशत्रुतापनः एते
चान्येचबहवोराजानश्चासुविश्रुतः २८ तैःपालितेयंवसुधाकीर्तिमद्भिर्धृतव्रतैः एतेषांच
रितंकथनेविनायकनहिक्षमः २९ बहूपरोक्तिनांचैववंशावलुप्ततयापिच बहुस्यात्संभवि
स्तारोऽतिमन्वानरुच्यते ३० अंगिरसंज्ञमेसेविन्निश्रुतोऽकुषुविश्रुतः सद्वरोनृपतिर्जज्ञे
दमनोनामभूपतिः ३१ दमनाद्धारवीराजाकाशिराजास्यतत्सुतः तत्सुत्रश्चाश्विनोराजाद्दु

मौलिश्चतत्सुतः ३२ तस्यवंशेनृपोजज्ञेस्कमनोनामवैनृपः येतस्यात्कालिनामाभूत्सुनश्चं
द्रेश्वरः ३३ तस्यवंशेनृपोजानोहरिनामाविवेकवान् तस्मायुरितिविख्याविख्यातोभा
तुश्चततःपरं ३४ गोपालागुह्यकोराजावारिवाहश्चतत्सुतः वारिवाहाद्रसेनोमाहावाहु
श्चतत्सुतः ३५ तस्मात्सभद्रकोराजावीरबाहुस्ततोभवेत् तस्माच्चकक्षिवान्जज्ञे
अनुराजाततःपरं ३६ ततोवैद्रोहिणोनामतस्माद्धृतिमानभूत् तस्माच्चगुरुभक्तेति
लोकेविख्यातपौरुषः ३७ अतिवीरस्ततोजातोततोसत्रकनामवान् धृतवशोमहावीर्या
त्लोकेविख्यातपौरुषः ३८ देवभक्तामाहात्मानोब्राह्मणातिथ्यकारकः दानविघ्नस्त
योयनिवेदयास्यानुचिंतकः ३९ एषांहिपौषविस्तारोजातोवैवसुधातले श्रवणात्कीर्तना
देषांपुण्यमनन्तायतेनरः ४० प्रतिलोमानुलोमाभ्यांवंशोविस्तारतांगतः कलौकलुषचित्ता
श्चकचिज्जातामहीतले ४१ इंद्रोप्याश्वेनभक्तस्यगर्भनाम्नोमुनेकुले जातोराजामाहा

वीर्योशैल्यनामास्कविश्रुतः ४२ शैल्यचमघनामाभूततोजातोहिवीर्यवान् रंभाराजाततोजज्ञ
ऋतुपर्णश्चतत्सुतः ४३ ऋतुपर्णोनागधोभूतत्पुत्रोमलयाश्वलः ततोमालवराजाभूतत्ते
वैरेयनंदीनृपः ४४ तस्माच्चगुरुवीर्योभूततोभद्रश्चनामकः प्रचुरोवंशवैस्तारोजातोपृथंध
रातले ४५ महायज्ञादिकर्त्तारोमहाधैर्योमलबलः दीर्घायुषोसुजातास्वधर्मतःशोभिपा
लकः ४६ कांत्याशिवाकरनिभाशैल्याचवसुधानिभा सत्यधर्मरताश्चैवदृढदेहाधराजि
ताः ४७ ब्रह्मण्यदेवताभक्तमांडव्यस्यऋषेःकुले उदारहिभरोराजातत्कृतःक्रमने
तिच ४८ तस्माच्छरभनश्चैवसुनःशेफेतिच शैकशृंगोधेवाहुश्चग्रामराजाततः
परं ४९ तस्माच्चरलनामाभूतत्पुत्रोमानसोनृपः तस्यवंशेनृपोजज्ञेयदुनाम्नागुणे
नमः ५० ततोवैश्वेतनामाभूत्तत्पुत्रोवैकालिकाभिधः तस्माच्चगुणवान्जज्ञेराजा
लोकेषुवीर्यवान् ५१ महासेनस्यतत्पुत्रोधार्मिकस्यततस्सुतः सत्रसंधोततोराजा

वैदर्भ्यश्चतनोभवेत् ५२ एतेषां बंधुवर्गेभ्यः पूर्वेक्षानातथैवन्न वैशोधिस्वरतांयातो वैदर्भ्या
वसुधाभवेत् ५३ क्रमान्नष्टीणतांयातो पोयेजातेक्लौयुगे [illegible] स्वरैल्य
स्यसुनेःकुले ५४ प्रथमोयदुनामाऽद्वितीयेरवभास्करः तस्माद्धुरथोजातोतत्सुतोग
जेनेतिच ५५ गोजेमारटधारीतितस्मात्खड्गधरोनृपः तत्तोभश्रीवनोनामागराजाच
तत्सुतः ५६ गुणराजातनोजातोतत्सुतोशिवनामकः शिवास्वशिवनामोभूत्तमसाक्ष
लश्चतत्सुतः ५७ तस्माद्धुंदुधिरेमार्द्धिकराजाचतत्सुतः तत्सुतोदेवकोनामाऽनिरुद्ध
श्चतत्सुतः ५८ ततोगोपालिनामाभूत्तमदनैवतनोभवेत् सुनेत्रस्तत्सुतोजातोधनिय
जातस्तोपरि ५९ एतत्तान्येचचत्वारोसोमवंशोद्भवोनृपः गुणवंतोमहासत्वोकेवि[illegible]
तपोरुघः ६० त्रैलोक्यख्यातिजेतारोपौरुषेणसुरेःसमाः नीलांबराख्यस्कंधस्यपार्श्वतः
स्यसुनेःकुले ६१ पौंड्रकःप्रथमोराजातत्सुतश्चसुधन्वाभिः साधवस्तत्सुतोजज्ञेनांगस्यश्च

ततःपरं ६२ ततस्तुप्रीतिमान्राजासत्यराजातनोभवेत् सोमदंतस्ततोजज्ञेसुपालस्तत्सुतस्तथा
६३ सूर्येनामातनोजातोमहातेजास्ततोभवेत् इंद्रनामातनोजज्ञेकार्त्तिकोनामतत्सुतः ६४
ततोवीरेणकुल्लानामतत्सुतोरिपुनाशकः ततोवंशधरोराजाहरिवंशस्ततोभवेत् ६५ मंत्रछ
त्रततोजातोमंत्रज्ञश्चततःपरं ततोविद्याद्युतिख्यातोशास्त्रवक्ताततःपरं ६६ ततोभू
मंद्रनोनामअंशुमालीततोभवेत् ततःशांतोमुनामाभूद्बृहद्भश्चतत्सुतः ६७ उक्तेष्वा
न्येपिसंजाताऋषिगोत्रसमुद्भवाः सत्यदुत्साकरयुताः शास्त्रविद्याविशारदः ६८ कोला
बादेविभक्तस्यप्रियर्षेर्गोत्रसंभवः प्रथमोऽघनोनामाशीलराजाततःपरं ६९ तत्सुतो
गोदराजेतितस्मात्गोचरनामकः अमरप्रियनामाभूत्तत्सुतोलोकविश्रुतः ७० त्रि
खंडिनामकोराजातस्यैवपुत्रतांगतः तत्सुतोकर्कशाख्याभूत्कोलनामाततोभवेत् ७१
तस्यकृष्णततोजज्ञेहरिदश्वाततःपरं योगराजातातोजज्ञेशुक्रनामाततःपरं ७२ चारण

स्तत्सुतो जातोचंडनामाततोभवेत् एवमन्येपिभूपालोजात्यंविस्तारतोगताः ७३ कीर्तिवर्ष
नमेतेषांयदिकुर्यामहंतदा ग्रंथोविस्तारतांगच्छेद्विष्कंभेसमासतः ७४ अथवायाःसकवि
तस्यरंध्राविप्रोमुनेकुले प्रथमोमन्मथोनामतत्पुत्रःसुमनोनृपः ७५ तस्माच्चमृगना
माभूत्माहावीरश्चतत्सुतः महावीराद्धूरिराजातत्सुतोकविमंडनः ७६ श्येनजिल्लस्तुतः
कौशेयातिबाहुश्चतत्सुतः ततोभद्रसेननामाभूत्तत्पालभस्तत्सुतःस्मृतः ७७ शतभाद्धू
नुकोराज्यदमनश्चततःपरं दमनाद्दृढकोनामजज्ञेमित्रस्ततोभवेत् ७८ प्रवहस्तत्सुतः
प्रोक्तोकीर्तिमालिश्चतत्सुतः एतेचान्येचबहवोराजानोवीर्यवित्तमः ७९ विष्णुरंध्रकुले
जातोविख्यातोभुवनत्रयं वागेश्वर्यांस्तुभद्रस्यवेश्यायांवरवर्तमुनेःकुले ८० जातोप्रथम
तोराजापारशिनामाक्षितिः तस्माच्चवेणवोराजाकीर्तिमालीचतत्सुतः ८१ ततस्तामास
योनामवृहद्रथातःपरं ततोरंध्रकनामाभूत्तोहिषस्ततःपरं ८२ क्षेमभूर्तिस्ततोजा

तोमघनाहस्ततःपरं जज्ञेपरंजनांकःवायुवाहस्ततोजनी ८३ तस्माच्चसेत्रकुज्जेततोजातः
समीरणः बाहुशालीततोजज्ञेगुणशालीततोभवेत् ८४ एचराज्ञाःसकवहवोजातास्त्रभूमि
भूरिशः अतस्तेहिमयातस्याक्षेत्रधर्मस्यरक्षकः ८५ रंध्रलक्ष्मीदेवतामद्रनाम्नोमुनेः
कुले प्रथमोरंध्रकोनामतत्पुत्रःश्यामलोनृपः ८६ श्यामलकीर्तिमालिश्चवृहत्सवाहश्चत
त्सुतः ततस्तश्चमहावीर्यकीर्तिमांश्चततःपरं ८७ मयूरध्वजनामाभूत्तद्वीर्यवित्तमः
तद्वीरचक्रवर्तीभूत्तक्षोणिपालश्चतत्सुतः ८८ ततोवैरमनोनामापुंडरीकस्ततःपरं हरि
मेधातनोजातोपश्चपालस्ततोभवेत् ८९ उग्रधन्वातनोजज्ञेतनोभूधरनामकः उग्र
वेगस्ततोबाहुबहुविद्याविशारदः ९० ततोविख्यातकीर्तिश्चहेमपालिस्ततोभवेत् त
तोन्यपिचराजानोवीर्यवंतोमनस्विनः ९१ जातास्तोषितलेतिपुराणेशुस्त्रविश्रुताः
महादेश्वभक्तस्यकृपायोश्वमुनेःकुले ९२ अधोशोनामराजाभूत्कांतिराजाचतत्सुतः

ततस्तत्सुंदरोराजामेधावीचततःपरं ९३ ततःपुरंदरोनामऔर्विकायास्ततोभवेत् तस्मा
च्चमेघनादोभूत्तद्वंशेबलभीरुपः ९४ तस्माद्वसिष्ठनामाभूत्प्रतिवीर्यीततोभवेत् त
तोवैकुरुवैनाम्नासर्वजिच्चततोभवेत् ९५ ततोभद्राश्वनामाभूत्वीर्यश्चततस्ततोभवेत्
ततश्चयज्ञकुद्राजातद्वंशेवंशवर्धनः ९६ स्मरजित्तत्सुतोजातोततोभून्मधुरत्वनः के
किथाहस्ततोजातोततोपिंगाक्षनामकः ९७ पुरुजिच्चततोजज्ञेकपिलाश्चततःपरं मही
धरस्ततोजातोऽमलश्चततोभवेत् ९८ दंडधारस्ततोजज्ञेतद्वंशेशत्रुतापनः एवमाद्य
मलराजानोवीर्यवंतोधृतव्रतः ९९ आसमुद्रामहीमेतांपालयित्वादिवंगतः अजयाश्च
नुभिःसर्वैमंत्रसादेनतेभवत् १०० तामसीदेवताभक्तश्चामरस्यमुनेःकुले अथमशशिरा
जाभूत्तद्वंशेचद्भूपतिः १ तत्रात्रिरायुराजाभूत्तद्वंशेधर्मनामः तद्वंशेबहवोजाताराजानः
सत्यविक्रमाः । सुरत्ववंशस्यतेषांतुनामिरद्धिःकलौयुगे वज्रपाणेर्विभक्तमार्गेऽस्यमु

नेःकुले २ अथमोहनराजाभूत्तद्वंशेसुखवर्धनः तद्वंशेमालुलीनामस्त्रिंधरस्तत्सुतःस्मृतः
४ वीरहामस्ततोजातोधृषद्रस्ततोभवेत् तद्वंशेमेघनादश्चतद्वंशेन्येनयाभवत् ५ भू
रास्त्वहंविद्यास्वर्गराधिकराभवत् मालनेरासुभक्तस्यबालभ्यस्यमुनेःकुले ६ सार
यहतिनामाभून्महाविद्याविशारदः तद्वंशेवंशगुप्ताभूत्तद्वंशेशैर्यमंडनः ७ तद्वंशक
र्मवंद्याश्चवीरबाहुस्ततोजनि तद्वंशेशास्त्रजीविश्वविद्याजीवित्ततोभवेत् ८ एत्यमा
वक्तराजानोऽन्यचापिनियोजिताः विद्याविनयसंपन्नाधृतिवंतोमहाबल ९ स्त्री
कादेवीभक्तस्यभूपमाश्वमुनेःकुले प्रथमोवज्रदंष्ट्राभूत्सुभक्तोजज्ञेततोभवेत् १०
मत्स्यवंशेनृपोजज्ञेसरामणहतिश्रितः तस्माद्रोमनभूपालोतास्वाश्चततोभवेत्
११ मत्स्यवंशेमहावीरोकामाक्षद्भूपतिः तद्वंशेचनृपोजातोबहवोवंशवर्धनः १२
धृतिमंतोमहावीराराक्षसेसुमुनिश्रितः जलवेध्यासुभक्तस्यजांबीलस्यमुनेःकुले १३

BHAU DAJI MEMORIAL

भवेत् अर्जुनात्सार्ज्जुनोनामपरिक्षेश्शस्तोभवेत् ३४ परिक्षाधर्मराजाभूत्तुपमन्युस्ततोभवेत्
उपमन्युरंशोवर्णेनसुत्रेद्रसिलेतिच ३५ एवंभूपामहावीरासर्वेशाधर्मरसकः कालदेवता
भक्तदुंदुभेश्चमुनेःकुले ३६ सुग्रीवःप्रथमोराजाबहुश्रीबहुबुधिमान् कर्मवान्ततस्ततेज
शेरिपुहंतातस्तोपरि ३७ ततःसुक्रतीनामादेवरातश्चतत्सुतः तस्यवंशेनृपोजातोभास्क
रेतिचनामतः ३८ भास्करानोनिनामाचतस्मिन्नरथेतिच ततस्तुशरभोनामातस्तोन्येपि
बभूविरे ३९ पालमालिनिदेव्याश्चबृहद्विणेनामवैऋषिः सत्यसंधसुतोभक्तद्रोण्यस्यच
तोभवेत् ४० सात्यकीतत्सुतोजज्ञेतत्सुतःप्रतनामतिः तद्वंशेभास्करोनामतस्मिन्नसुरकंदनः
४१ तद्वंशेन्यापिसंजातोबहवोरिपुमर्दनः चंपावतीसभक्तस्यगोपनाम्नोऋषेःकुले ४२
प्रथमश्चैत्रराजाभूदुक्षवस्तत्सुतोभवेत् तद्वंशेरुपतिर्जज्ञेभालुकीयश्चतत्सुतः ४३ तद्वंशे
भूमिपोनामश्रुतकीर्तिमहिश्रुतः श्रुतसेनस्ततोजातोमहावीर्यस्ततोभवेत् ४४ तद्वंशेऽ

तिभक्तोनामतद्वंशेविचक्षणः तस्यवंशास्यविस्तारोजातोवेमेदिवीतले ४५ दुर्गादेवीसुभक्तस्य
कुमारस्यमुनेःकुले ४६ प्रथमोधर्मराजाभूत्तत्सुतःश्रवणोनिच ४६ श्रवणाच्छ्रुतदेवस्य
अश्ववाहस्ततोभवेत् ततोधुर्मधरेवीतद्वंशेधनकोनृपः ४७ तद्वंशेतुरेलराजातद्वंशेशाल
नामकः तत्सुतःकृपनामाभूत्तद्वंशेवसुतोभवेत् ४८ हरिवरीदेवताभक्तकुमारेश्वसुनेःकु
ले प्रथमोरिपुनाशाख्योतत्सुतःसुचकाभिधः ४९ तद्वंशेविश्वजिन्नामभानुमालीततो
भवेत् तद्वंशेमित्रकृद्राजातद्वंशेबहुधाभवेत् ५० परिविश्रुतोजातोवंशावृक्षस्ततोभवे
त् तद्वंशेपिवीरेन्द्राक्षाधरेतुतनोभवेत् ५१ धरण्यन्तस्ततोजातोतद्वंशेभूविवर्धनः
वीरवर्याश्वभक्तस्यमित्रवर्षश्वमुनेःकुले ५२ प्रथमोशारकोराजाराजराजाचतत्सुतः
तद्वंशेवीरहाजातो सुरमित्रस्ततोभवेत् ५३ तद्वंशेबोधनोनाभद्रश्वश्चमतोभवेत् उ
ग्रधन्वातताजातोततोवेमधुपव्रतः ५४ गुणग्राहीततोजातोतद्वंशेभूविवर्धनःश्रीर

हाचनतोजातोगोपतिर्नामतत्सुतः ५५ सांदीपनिर्देवताभक्तश्चंद्रहंत्र्यमुने कुले प्रथमतोरा
नराजाभूतत्रामराजातोभवेत् ५६ गविजन्मततोराजाशैलधन्वातोभवेत् वृहत्तो
नततोराजापद्ममालीततोभवेत् ५७ हेमांगस्तत्ततोजज्ञे वृहद्रोधर्मनंदनः ततोवसु
पतिर्नामवसुमालिस्ततोभवेत् वृहत्सेनस्ततोराजाधर्मगोधातनोभवेत् मेधोन्येचे
वराजानःकुलवृद्धिकरानृपाः ५८ धरातलस्यगोसारोबभूवुर्मत्स्यरायणाः पारत्रादेवि भ
क्तस्यबकदाल्भ्यमुनेःकुले ६१ जातःप्रथमतोराजाशालमलीनामभूपतिः तस्यवंशेनृपो
जज्ञेकाश्मीरइतिनामकः ६२ तस्मादीश्वरनामाभूतेजोराशीचतत्सुतः तद्वंश्योपिभू
पालोशौर्यार्यसमन्वितः ६३ स्मरिताद्देवताभक्तोमहर्षेर्मुनेःकुले जयवान्नामभू
पालोतत्सुतोकमलेतिच ६३ तस्यवंशेनृपोजज्ञेपवित्रइतिनामकः पवित्रास्यारिजाताश्च
बभूवुःशत्रुतापनः ६४ मालमालिनिभक्तस्यकुर्मनाम्नोमुनेःकुले जातःप्रथमतोराजा

प्रणनाथइतीरितः ६५ तस्यवंशेनृपोजज्ञेशालबाहुरितीरितः तदन्वयेनृपोजातोदीर्घ
बाहुरितीरितः ६६ तस्माच्चवीरसेनाभवभूवुःप्रतिवर्धनः सुजादेव्याराधकस्यसुकुमाल
मुनेःकुले ६७ जातःप्रथमतोराजाविदर्भइतिविश्रुतः विदर्भात्कर्मकारश्चतद्वंश्यश्च
तिवर्धनः ६८ अरिहाच्चततोजातोशिवराजाततःपरं तस्माद्वीरभद्राद्यःबहवःसंबभूवि
रे ६९ माहेश्वराषुजयस्यभावनस्यमुनेःकुले जातोहिवेजयंतेलितद्वंश्योजुनामकः ७०
ततःशौचइतिप्रोक्तोबाह्यशालभोनृपः ततोवैकर्णनामाद्याज्ञात्रिरेवहवोनृपाः ७१ का
त्यायन्याराधकस्यमालिवंतऋषेःकुले पार्थिवोनामराजाभूत्तद्वंशेवीर्यवर्धनः ७२ त
दन्वयेऽमित्रस्यमत्स्यध्वजइतीरितः तद्वंश्यव्यापकाद्याश्चजाताःपार्थिवनंदनः ७३ का
लिन्याश्चराधकस्यचित्रनाम्नोमुनेःकुले भूरिसेनइतिख्यातोभूरिवीर्यस्ततोपरि ७४
जंबुनामाचतद्वंशेकीर्तिमालीततोभवेत् कृतिकृच्चततोबाहुवीरसेनस्ततःपरं ७५ त

इन्वयेचवहवोजरुणाद्याभवन्नृपः ७६॥इतिश्रीस्कंदपुराणेसह्याद्रिखंडेऽगस्तितीर्थमहात्म्येशि
वगणेशसंवादेसोमवंशोत्पत्तिकथनंनामैकत्रिंशत्तमोध्यायः ॥३१॥ ॥ ॥

श्रीगणेशायनमः श्रीमहादेवउवाच ॥अत्रेरोदेवनाभनाऽजनिष्टमुनेकुले जातोऽवहोनामाभू
षदस्तस्यसुतोभवेत् १ वृषदश्वोलिनामाभूल्लीलादग्धशिखःस्मृतः तस्यचेन्वयेनृपोजातोनाम्नाध्वज
इतीरितः २ तस्मात्तुहंसकेचाद्यावहवोजज्ञिरेनृपाः दृढिमादेवनाभस्तुसुकुलस्यकुलेऽ
वासुकिर्नामभूपालोमलुग्रोऽजमरोत्तमः तस्माच्चकरवीरोभूत्भूषणोनामतस्सुतः ४ भूषणाद्दृ
ढिनामाभवद्दृढरोमरजोन्नृपः वज्रनाभेविभल्लस्यपरिजातकुलेकुले ५ कीर्तिमानितिविख्या
तोवधिष्मतस्सुतःस्मृतः ततोभूत्वृषसेनश्चततोदुर्मर्षणःस्मृतः ६ दुःखहेतिततोजज्ञेदृ
ढोन्यपिजज्ञिरे वैस्मवीरवनाभस्तुपार्णवमुनेकुले ७ जालशूरवरोराजाश्रमाधीनस्सुतःस्मृतः
कुरुवर्यस्ततोजातोसुबाहुस्तस्यतःस्मृतः ८ जितारिस्तुसुबाहुस्तस्यवहवोजज्ञिरेनृपाः उग्रणी
रेवतापुज्याश्रगत्यस्यवेभूवहि ९ तस्मेत्रजोन्नृपोनाम्नावासुदेवइतीरितः तस्माच्चसुषेण
भल्लरंहुंयमस्तस्मादन्वये १० तस्माच्चदृढसेनाभूत्ततोरामोदृढव्रतः सख्यमित्रततोजातोहरि

भरूरूतोभवत् १९ ततोवैवहवोजातोहर्यश्वनतत्परः मोहिनीदेवतामरुद्शाल्मलीनामवैमु
नेः २० तद्वंश्येभूपतिर्नातोजातिवीरइतिरितः ततोभूविंदुमित्रेतितनुःशार्यातिनामकः २१
शार्यातुरुभगोनाम्नातोवैश्ववणाभिधः विश्ववसुततोजज्ञेश्रीरवोनामतत्सुतः १४ उत्त
मोजातोजातोतोदुहिरवपावनः तदन्वयेपुंधुमारोक्षोणीशोभ्वततोभवत् १५ सुवर्णदे
विमरुत्स्यजात्रेयस्यमुनेःकुले जातःसुदेत्मानामाहिनस्मृतोबमरुत्यपि १६ तदन्वयेति
वीरश्चाश्रमालिस्ततोजनि तद्दोगमनामाभूत्ततोन्येपिबभूविरे १७ भवानीदेवताम
रुद्भीमर्षिस्तस्यवैकुले जातोरुक्मरथोनामकुरुस्मरुतः स्मृतः १८ पुरुषाख्यततोजा
ततोवैपुरुषेश्वरः तदन्वयेमर्दयन्मततोन्येपिबभूविरे १९ भानिनीदेवतामरुन्महात
परुषेःकुले जातःसुक्षत्रयनामाभूत्ततोभीमविक्रमः २० ततोहिदुमिलोनामकुरु
घतस्मरुतःस्मृतः अंगराजततोजातोभरसेनस्ततोभवेत् २१ तनयःशांताभिधोजातो

ततोभूत्सिंहविक्रमः रिपुमर्दीततोजातोततोन्येसंबभूविरे २२ जानिनीदेवतामरुदुपमन्यु
रुषेःकुले आदिराजेतिविख्यातोमहाराजततोभवेत् २३ सौपिविदेवतामरुद्गांडिल्यस्य
मुनेःकुले महाराजेतिविख्यातोततोभूद्वरवीरः १९ तदन्वयेवरुवीर्यश्चमनस्वतरतीरि
तः तदन्वयेवीरसेनोकांतिमालीततोपिच २५ आर्चिष्यायास्ततोजाताभूमंडलसुरक्षकाः
हलिनीदेवतामरुद्विभांडकरुषेःकुले २७ जरिमहीभरोजज्ञेविक्रमीचरतःपरं क्षेमधू
र्तिस्ततोज्ञातोकलिंगस्मरुतःस्मृतः २९ विमलस्मरुतोनाम्नावीरोबाहुसुतःपरं विरत
स्मरुतोनाम्नोक्तोहेमधनाततोभवेत् २९ ततोजाताःसुबहवःपुत्राक्षप्रमुखाःसुताः दैत्य
नाम्नानिमरुतस्यधार्मिकस्यरुषेःकुले ३० प्रीतिमालीनिविख्यातोउरुवीर्यस्ततःपरं उरु
वीर्यासुरुर्नामविमलस्मरुतःस्मृतः ३१ स्मरुतस्मरुतःप्रोक्तोरुद्रोविश्वततःपरं शा
श्वतस्मरुतःप्रोक्तोविदर्भस्मरुतःस्मृतः ३२ रुपमालिस्ततोजातोऽप्यशेषीततोभवत्

प्रभावत्यामपूजकस्यसालिकस्यऋषेःकुले ३३ जातःसहस्रजिन्नामामहावीर्यस्ततस्ततः तदूर्ध्वेवृहद्ध्वाक्षेकातुमालिस्ततोभवत् ३४ ततस्तुछायमुखाबृहवःसंवभूविरे शिलादेव्याराधकस्यब्रह्मर्षेश्वमुनेःकुले ३५ जातःचित्ररथोनामचित्रहस्ततोभवेत् ततःसंपातिनामाभूत्तन्मालिस्ततोवभौत् ३६ आयुर्नामस्ततोराजाततोभूरियशोभवत् तदूर्ध्वेचमहासेनोतातोराजाविडूरथः ३७ तदूर्ध्वेअंभरद्याश्ववरास्तोणिस्ततोभवेत् वेगलाराधकश्चैवजनार्दनऋषेःकुले ३८ श्रीमतोनामराजाभूत्वैद्यूतश्चततोभवत् विद्युज्जिद्वस्ततोदूरोशलनामकः ३९ प्रभावतीप्रमुखास्तस्यबंधोर्वीरस्ततोभवेत् पाप्मिणीदेविभक्तस्यविमलाख्यऋषेःकुले ४० गजोनाममहाराजाभवत्पक्षस्ततःस्मृतः गवाक्षस्तस्ततोजातोविप्रराजातदन्वये ४१ तदूर्ध्वेमेघनादाद्याबीराश्चासन्महाबलाः अमराराध्यकस्यापिचातानाम्नोऋषेःकुले ४२ आसीन्महीधरोराजा

